तैत्तिरीयोपनिषद् - ब्रह्ममेध सहिता (सस्वरा) - slightly pinholed.

Madras, 1960.

1522

(4)

Veda.

Bill No. 5/07-08

272

2008-0734

Indira Gandhi National Centre for the Arts

॥ श्रीः ॥

# ॥ तैत्तिरीयोपनिषत् ॥

(सस्वरा)

Indira Gandhi National
Centre for the Arts

चेन्नपुर्यां

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्

इत्येतैः प्रकटिता

१९६०

*All Rights Reserved.*

1522

DATA ENTERED
Date... 01-09-08

SANS
294.59218
TAI

बेळपुर्याम्
श्रीराम मुद्रणालये
मुद्रिता ॥

Indira Gandhi National
Centre for the Arts

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-734
Date: 29.3.08

॥ श्रीः ॥

# ॥ तैत्तिरीयोपनिषत्प्रारम्भः ॥

## ॥ प्रथमः प्रश्नः ॥

(ब्रह्मोपासनाविधिः सपरिकरः ।)

अनुवाकाः १२. कांडर्षयः-सांहितीर्देवता उपनिषदः ।

### ॥ शांतिपाठः ॥

शंनो मित्र श्शं वरुणः ।...ओं शान्ति श्शान्ति श्शान्तिः ।

### ॥ प्रथमोऽनुवाकः ॥

Indira Gandhi National Centre for the Arts

॥ ब्रह्माध्येष्यमाणस्य प्रत्यूहशान्तिः ॥

हरिः ओम् ॥ शं नो मित्र श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु रुरु क्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्व मेव प्रत्यक्षं ब्रह्मासि । [1]त्व मेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तार मवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्तिः शान्ति श्शान्तिः ॥ १ ॥

सत्यंवदिष्यामि पंचच ॥ १ ॥

---

1. 'त्वामेव' इत्येव शंकरभाष्यानुसारीत्यनुमीयते ॥

## ॥ द्वितीयोऽनुवाकः ॥

॥ ब्रह्माध्ययनप्रसङ्गागतः शिक्षाशास्त्रार्थसंग्रहः॥

शीक्षां व्याख्यास्यामः । वर्ण स्स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्त श्शीक्षाध्यायः ॥ २ ॥

शीक्षां पञ्च ॥ २ ॥

## ॥ तृतीयोऽनुवाकः ॥

॥ संहितोपासनम् ॥

सह नौयशः । [1]सह नौ ब्रह्मवर्चसम् । अथात स्संगंहिताया उपनिषदं व्याख्यास्यामः । पञ्चस्वधिकरणेषु । अधिलोकमधि-[2]ज्यौतिष मधिविद्य मधिप्रजं मध्यात्मम् । ता महासंगंहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौ रुत्तररूपम् । आकाश-स्सन्धिः ॥ ३ ॥

वायु स्सन्धानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपस्सन्धिः । वैद्युतस्सन्धानम् । इत्यधिज्यौतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् ॥ ४ ॥

अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनगं सन्धानम् । इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजा सन्धिः । प्रजननगं सन्धानम् । इत्यधिप्रजम् ॥ ५ ॥

---

1. 'सह' इति उदात्त स्वरपाठः महाराष्ट्रीयैः कैश्चित् शिष्टैरादृतः ।
2. 'ज्योतिष' मिति । क्वचित् पुस्तके पाठः सर्वत्रैवमेव ॥

अथाध्यात्मम् ॥ अधराहनुः पूर्वरूपम् । उत्तराहनुरुत्तररूपम् । वाक्सन्धिः । जिह्वा सन्धानम् । इत्यध्यात्मम् । इतीमा महासꣳहिताः । य एवमेता महासꣳहिता व्याख्याता वेद । सन्धीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन [1]सुवर्गेण लोकेन ॥ ६ ॥

सन्धि राचार्यः पूर्वरूप मित्याधिप्रजं लोकेन ॥ ३ ॥

---

## ॥ चतुर्थोऽनुवाकः ॥

### ॥ मेधादिसिद्ध्यर्था मन्त्राः ॥

यश्छन्दसा मृषभो विश्वरूपः । छन्दोभ्योऽध्य मृताथ्संबभूव । समेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरिविश्रुवम् । ब्रह्मणः कोशोऽसि मेधयापिहितः । श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥ ७ ॥

कुर्वाणा चीर मात्मनः । वासाꣳसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रिय मावह । लोमशां पशुभिस्सह स्वाहा । आमायन्तु ब्रह्मचारिणस्स्वाहा । [2]विमाऽऽयन्तु ब्रह्मचारिण स्स्वाहा । प्रमाऽऽयन्तु ब्रह्मचारिणस्स्वाहा । दमायन्तु ब्रह्मचारिणस्स्वाहा । शमायन्तु ब्रह्मचारिण स्स्वाहा ॥ ८ ॥

---

1. 'सुवर्ग्येण' इति महाराष्ट्रीयादिषु प्रसिद्धः पाठः ।
2. विमायन्त्वित्यादि वाक्यचतुष्टयं द्राविडैर्न पठ्यते ।

यशोजनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा । तंत्वा भग प्रविशानि स्वाहा । समा भग प्रविश स्वाहा । तस्मिन्थ्सहस्रशाखे । निभगाऽहं त्वयि मृजे स्वाहा । यथाऽऽपः प्रवताऽऽयन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वत स्वाहा । प्रतिवेशोऽसि प्रमाभाहि प्रमापद्यस्व ॥ ९ ॥

[1]वितन्वाना शमायन्तु ब्रह्मचारिणस्स्वाहा धातरायन्तु सर्वत स्वाहैकञ्च ॥ ४ ॥

## ॥ पञ्चमोऽनुवाकः ॥

### ॥ ब्रह्मोपसनाङ्गव्याहृत्युपासनम् ॥

भूर्भुव स्सुव रिति वा एता स्तिस्रो व्याहृतयः । तासामु ह स्मैतां चतुर्थीम् । माहाचमस्यः प्रवेदयते । मह इति । तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः । भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम् । सुव रित्यसौ लोकः ॥ १० ॥

मह इत्यादित्यः । आदित्येन वाव सर्वे लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुव रित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वावसर्वाणि ज्योतींषि महीयन्ते । भूरिति वा ऋचः । भुव इति सामानि । सुव रिति यजूंषि ॥ ११ ॥

1. 'वितन्वाना विशस्वाहा सहच' इति द्राविडानां पाठः ।

मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः । सुव रिति व्यानः । महइत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते । तावा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । तायो वेद । स वेदब्रह्म । सर्वे ऽस्मै देवा बलिमावहन्ति ॥ १२ ॥

असौ लोको यजूंषि वेद द्वेच ॥ ५ ॥

---

## ॥ षष्ठोऽनुवाकः ॥

॥ मनामयत्वादिगुणकब्रह्मोपासनम् किञ्चित् सूक्ष्मदर्शिमध्यमाधिकारिणः ॥

Indira Gandhi National Centre for the Arts

स य एषोऽन्तर् हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः । अन्तरेण तालुके । यएष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रति तिष्ठति । भुवइति वायौ ॥ १३ ॥

सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् । वाक्पति श्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं मन आनन्दम् । शान्तिसमृद्ध ममृतम् । इति प्राचीनयोग्योपास्व॥ १४॥

वाथा वमृत मेकं च ॥ ६ ॥

---

## ॥ सप्तमोऽनुवाकः ॥

पृथिव्याद्युपाधिक ब्रह्मोपासनम् । मन्दाधिकारिणः ॥

पृथिव्यन्तरिक्षं द्यौ र्दिशोऽवान्तर[1]दिशाः अग्निर्वायु-रादित्य श्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् । प्राणोव्यानोऽपान उदान-स्समानः । [2]चक्षुश्श्रोत्रं मनो वाक् । त्वक् चर्ममागं सग् स्नावाऽस्थि मज्जा । एत दधि विधाय ऋषि रवोचत् । पाङ्क्तं वा इदगं सर्वम् । पाङ्क्तेनैव पाङ्क्तगंस्पृणोतीति ॥ १५ ॥

सर्व मेकं च ॥ ७ ॥

---

## ॥ अष्टमोऽनुवाकः ॥

॥ प्रणवोपासनम् (शुद्धब्रह्मोपासनम् ), उत्तमाधिकारिणः ॥

ओ मिति ब्रह्म । ओमितीदगं सर्वम् । ओमित्येतदनुकृतिह स्म वा अप्योश्रावयेत्याश्रावयन्ति । ओ मिति सामानि गायन्ति । ओगं शो मिति शस्त्राणि शगंसन्ति । ओ मित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओ मिति ब्रह्मा प्रसौति । ओ मित्यग्निहोत्र मनु-जानाति । ओ मिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ १६ ॥

---

1. 'दिशः' इति क. पुस्तकपाठः ।

2. 'चक्षुश्शोत्रंमनोवाक्, त्वक्चर्ममागं सग्गंस्नावास्थिमज्जा' इति द्राविडाः पठन्ति ।

ओं दश ॥ ८ ॥

---

## ॥ नवमोऽनुवाकः ॥

॥ उपासकधर्माः ॥

ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यꣳ पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः ॥ १७ ॥

प्रजा च स्वाध्यायप्रवचनेच षट्च ॥ ९ ॥

---

## ॥ दशमोऽनुवाकः ॥

॥ ब्रह्मयज्ञासमर्थस्य जप्यः मन्त्रः, ब्रह्मज्ञानप्रकाशकः ॥

अहं वृक्षस्य रेरिवा । कीर्तिꣳ पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणगूं सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ॥ १८ ॥

अहगूं षट् ॥ १० ॥

## ॥ एकादशोऽनुवाकः ॥

॥ उत्तरशान्तिपाठरूपः ॥

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यं ॥ धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १९ ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि ॥ २० ॥

नो इतराणि । ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः । तेषां त्वयाऽऽसने न प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ २१ ॥

ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् ॥ २२ ॥

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं तानि त्वयोपास्यानि विचिकित्सा वा स्यात्तेषु वर्तेरन्धसप्तर्च ॥ ११ ॥

## ॥ द्वादशोऽनुवाकः ॥

॥ उत्तरशान्तिपाठरूपः ॥

शं नो मित्र श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्व मेवप्रत्यक्षं ब्रह्मासि । त्व मेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्य मवादिषम् । तन्मामावीत् । त द्वक्तार मावीत् । आवी न्माम् । आवी" द्वक्तारम् । ओं शान्ति श्शान्ति श्शान्तिः ॥

सत्य मवादिषं पञ्च च ॥ २ ॥

[1]शंन श्शीक्षाग् सहनौ यश्छन्दसां भू स्सय४ पृथिव्यो-मित्यृतं चाहं वेदमनूच्य शंनो द्वादश ॥ १२ ॥

शंनो मह इत्यादित्योनो इतराणि त्रयो विंशतिः ॥ २३ ॥

॥ उत्तरशांतिपाठः ॥

शंनोमित्रश्शंवरुणः ।......अवतु वक्तारम् ॥ ओं शान्ति-श्शान्तिश्शान्तिः ॥ हरिः ओम ॥

तैत्तिरीयोपनिषदि प्रथमः प्रश्नः स्समाप्तः ।

---

1. द्राविडास्तु आनन्दब्रह्मभृग्वाख्यवल्लीद्वयविशिष्ट एक एव प्रपाठक इत्याहुः । अतः 'सत्यमवादिषं पञ्च च' इत्यस्मादनन्तरं सहनाववत्वित्येतत्पठन्ति।

॥ श्रीः ॥

# ॥ तैत्तिरीयोपनिषदि ॥

## ॥ द्वितीयः प्रश्नः ॥

---

(ब्रह्मवल्ली ब्रह्मविद्याप्रकाशः)

॥ कांडर्षिः=वारुणीदेवता ॥

---

[1]अनुवाकाः नव

### ॥ शांतिपाठः ॥

Indira Gandhi National Centre for the Arts

हरिः ओम् ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु माविद्विषावहै । ओं शान्ति श्शान्ति श्शान्तिः ॥

---

### ॥ प्रथमोऽनुवाकः ॥

॥ कृत्स्नोपनिषत्सारसंग्रहमन्त्राः ॥

ओम् ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यंज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते

---

1. अस्य प्रश्नस्य वैदिकसंप्रदायानुसारेण अनुवाकाः नव । भाष्यमतेन तु अनुवाकद्वयमेव । तत्र प्रथमानुवाकः शान्तिरेव, द्वितीयानुवाकः ब्रह्मविदित्यारभ्य प्रश्नसमाप्तिपर्यंतं इति च ज्ञेयं । अत्रतु संप्रदायानुसारेण अनुवाकसंख्या सूचिता ।

सर्वान्कामान्त्सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशस्संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः । तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

---

## ॥ द्वितीयोऽनुवाकः ॥

### ॥ अन्नमयकोशविषयः ॥

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीग्ंश्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपियन्त्यन्ततः । अन्नग्ंहि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नग्ंहि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥२॥

---

Indira Gandhi National Centre for the Arts

## ॥ तृतीयोऽनुवाकः ॥

### ॥ प्राणमयकोशविषयः ॥

प्राणं देवा अनुप्राणन्ति मनुष्याः पशवश्चये । प्राणो हि भूताना मायुः । तस्मा थ्सर्वायुष मुच्यते । सर्व मेव त आयु र्यन्ति । ये प्राणं ब्रह्मो पासते । प्राणो हि भूताना मायुः । तस्मा थ्सर्वायुष-मुच्यत इति । तस्यैषएव शारीर आत्मा । यः पूर्वस्य । तस्मा द्वा एतस्मा त्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः । सवा एष पुरुषाविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजु रेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ३ ॥

Indira Gandhi National
Centre for the Arts

---

## ॥ चतुर्थोऽनुवाकः ॥

### ॥ मनोमयकोशविषयः ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति । तस्यैष एव शारीरआत्मा । यः पूर्वस्य । तस्मा द्वा एतस्मा न्मनोमयात् । अन्योऽन्तरआत्मा विज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः

पक्षः । सत्य मुत्तरः पक्षः । योग आत्मा । महःपुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ४ ॥

---

## ॥ पञ्चमोऽनुवाकः ॥

### ॥ विज्ञानमयकोशः ॥

विज्ञानं यज्ञं तनुते । कर्माणि तनुते ऽपि च । विज्ञानं देवास्सर्वे । ब्रह्मज्येष्ठमुपासते । विज्ञानं ब्रह्म चे द्वेद । तस्माच्चेन्नप्रमाद्यति । [1]शरीरे पाप्मनो हित्वा । सर्वान्कामान्थ्समश्नुत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्यो ऽन्तर आत्मा ऽऽनन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रिय मेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्मपुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ५ ॥

---

## ॥ षष्ठोऽनुवाकः ॥

### ॥ आनन्दमयकोशे ब्रह्मणः प्रतिपादनम् ॥

असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेतिचे द्वेद । सन्त मेनं ततो विदु रिति । तस्यैष एव शारीर

1. "शरीरे" इति च महाराष्ट्रीय शिष्टाः आद्युदात्तं पठंति ।

आत्मा । यः पूर्वस्य । अथातोऽनुप्रश्नाः । उताविद्वा नमुं लोकंप्रेत्य । कश्चन गच्छती ३ । आहो विद्वा नमुं लोकं प्रेत्य । कश्चि थ्समश्नुता ३ उ । सोऽकामयत । बहुस्यां प्रजायेयेति । स तपो ऽतप्यत । स तपं स्तप्त्वा । इदगं सर्व मसृजत । यदिदंकिंच । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चा भवत् । निरुक्तं चानिरुक्तंच । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानंच । सत्यं चानृतं च सत्य मभवत् । यदिदं किंच । तथ्सत्य मित्याचक्षते । तदप्येष श्लोको भवति ॥ ६ ॥

---

## ॥ सप्तमोऽनुवाकः ॥

### ॥ ब्रह्मसद्भावविषयः ॥

असद्वा इद मग्र आसीत् । ततो वै सदजायत । तदात्मानग्गं स्वयं मकुरुत । तस्मा तथ्सुकृतमुच्यत इति । यद्वैतथ्सुकृतम् । रसो वैसः । रसग्गं ह्येवायं लब्ध्वाऽऽनन्दीभवति । कोह्येवान्यात्कः प्राण्यात् । य देष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्ये ऽनात्म्ये ऽनिरुक्ते ऽनिलयने ऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदर मन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषो मन्वानस्य । तदप्येष श्लोको भवति ॥ ७ ॥

---

Indira Gandhi National Centre for the Arts

## ॥ अष्टमोऽनुवाकः ॥

### ॥ आनन्दमीमांसादिकम् ॥

☞ भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । सैषाऽऽनन्दस्य मीमांसा भवति । युवा स्यात्साधु युवाऽध्यायिकः [1] । आशिष्ठो द्रढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । [2]ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः । स एकः पितृणां चिरलोकलोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितृणां चिरलोकलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः । स एकः कर्मदेवानां देवानामानन्दः । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानां देवानामानन्दाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवानामानन्दाः । स एक इन्द्रस्यानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दाः । स एको बृहस्पतेरानन्दः ।

1. "ध्यायकः" इति भाष्यसम्मतः पाठः ॥

2. अथ मनुष्यपर्यायेऽपि—"श्रोत्रियस्य चाकामहतस्य" इति वाक्यं द्राविडाः पठन्ति ॥

श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पते रानन्दाः । स एकः प्रजापते रानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापते-रानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य । स य श्चायं पुरुषे । य श्चासा वादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राण-मयमात्मान मुपसंक्रामति । एतं मनोमयमात्मान मुपसंक्रामति । एतं विज्ञानमय मात्मान मुपसंक्रामति । एतमानन्दमयमात्मान-मुप संक्रामति । तदप्येष श्लोको भवति ॥ ८ ॥

## ॥ नवमोऽनुवाकः ॥

॥ आत्मनः अवाङ्मनसगोचरत्वप्रतिपादनम् ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतगं्ह वाव न तपति । किमहगं् साधु नाकरवम् । किमहं पाप मकरव मिति । स य एवं विद्वा नेते आत्मानगं् स्पृणुते । उभेह्येवैष एते आत्मानगं् स्पृणुते । य एवं वेद । इत्युपनिषत् [1]॥ ९ ॥

## ॥ उत्तरशान्तिपाठः ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीत मस्तु माविद्विषावहै ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥

1. अत्रानुवाकादिबोधकं वाक्यजातं द्राविडैः न पठ्यते प्रपाठकस्यासमाप्तत्वात् । तेषां मते "भृगुर्वैवारुणिः" "इत्यारभ्य इत्युपनिषत्" इत्यन्तो भागः तृतीयानुवाकरूपः ॥

ब्रह्मविदिदमयमिदमेकविंगूंशति रन्ना दन्न रसमयात्प्राणोव्या-
नोऽपान आकाशः पृथिवीपुच्छगूंषड्विंगूंशतिः ; प्राणंयजुर् ऋक्सामा-
देशोऽथर्वाङ्गिरस पुच्छं द्वाविंगूंशति यर्तश्श्रद्धर्तगूं सत्यं योगो महो-
ऽष्टादश ; विज्ञानं प्रियं मोदःप्रमोद आनन्दो ब्रह्मपुच्छं द्वाविंगूंशति
रसंन्नेवाथाष्टाविंगूंशति रसश्षोडश भीषाऽस्मान्मानुषो मनुष्यगन्ध-
र्वाणां देवगन्धर्वाणां पितृणां चिरलोकलोकानामाजानजानां कर्म-
देवानां ये कर्मणा देवानामिन्द्रस्य बृहस्पतेः प्रजापतेर्ब्रह्मण स्सयश्चसं-
क्राम त्येकंपञ्चाश द्यतः कुतश्च नैकमेकादश नव ॥ ९ ॥

ब्रह्मवि न्नव ॥ ९ ॥

हरिः ओम् ॥

तैत्तिरीयोपनिषदि द्वितीयः प्रश्नस्समाप्तः ॥

Indira Gandhi National Centre for the Arts

॥ श्रीः ॥

# ॥ तैत्तिरीयोपनिषदि ॥

## ॥ तृतीयःप्रश्नः ॥

---

(भृगुवल्ली - ब्रह्मज्ञानसाधनानि.)

॥ कांडर्षिः=वारुणीदेवता उपनिषत् ॥

1 अनुवाकः १०.

### ॥ शान्तिपाठः ॥

हरिः ओम् ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः ॥

---

### ॥ प्रथमोऽनुवाकः ॥

॥ ब्रह्मजिज्ञासोपाख्यानम् ॥

हरिः ओम् ॥ भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुश्श्रोत्रं मनो वाचमिति । तꣳहोवाच । यतो वा इमानि भूतानि जायन्ते ।

---

1. भाष्यकारमतेन अयं प्रश्नः अष्टमप्रश्नस्य तृतीयानुवाक इति ज्ञेयम् ।

येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

---

## ॥ द्वितीयोऽनुवाकः ॥

॥ अन्नंब्रह्मेतिपरिज्ञानम् ॥

अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तगं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ २ ॥

Indira Gandhi National Centre for the Arts

---

## ॥ तृतीयोऽनुवाकः ॥

॥ प्राणो ब्रह्मेति परिज्ञानम् ॥

प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तगं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ३ ॥

---

## ॥ चतुर्थोऽनुवाकः ॥

॥ मनोब्रह्मेतिपरिज्ञानम् ॥

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुन रेव वरुणं पितर मुपससार । अधीहि भगवो ब्रह्मेति । सगं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपोब्रह्मेति । स तपोऽतप्यत । स तप स्तप्त्वा ॥ ४ ॥

---

## ॥ पञ्चमोऽनुवाकः ॥

॥ विज्ञानंब्रह्मेतिपरिज्ञानम् ॥

विज्ञानं ब्रह्मेति व्यजानात् । विज्ञाना ह्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुन रेव वरुणं पितर मुपससार । अधीहि भगवो ब्रह्मेति । तगं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तप स्तप्त्वा ॥ ५ ॥

---

## ॥ षष्ठोऽनुवाकः ॥

॥ आनंदो ब्रह्मेतिपरिज्ञानम् ॥

आनन्दो ब्रह्मेति व्यजानात् । आनन्दा ह्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभि

संविशन्तीति । सैषा भार्गवी वारुणी विद्या । परमे व्योमन्प्रतिष्ठिता । [1]य एवं वेद प्रतितिष्ठति । अन्नं वानन्नादो भवति । महा न्भवति प्रजया पशुभि र्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ६ ॥

---

## ॥ सप्तमोऽनुवाकः ॥

॥ अन्नब्रह्मोपासकव्रतम् ॥

अन्नं न निन्द्यात् । तद्व्रतम् । प्राणोवा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेतदन्न मन्ने प्रतिष्ठितम् । स य एत दन्न मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवा नन्नादो भवति । महान्भवति प्रजयापशुभि र्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ७ ॥

---

## ॥ अष्टमोऽनुवाकः ॥

॥ अन्नब्रह्मोपासकव्रतम् ॥

अन्नं न परिचक्षीत । त द्व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्वापः प्रतिष्ठिताः । तदेत दन्न मन्ने प्रतिष्ठितम् । स य एत दन्न मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवा नन्नादो भवति । महा न्भवति प्रजयापशुभि र्ब्रह्मवर्चसेन । महा न्कीर्त्या ॥ ८ ॥

---

1. "स य एवं" इति भाष्यसम्मतः पाठः ॥

## ॥ नवमोऽनुवाकः ॥

॥ अन्नब्रह्मोपासकव्रतम् ॥

अन्नं बहुकुर्वीत । तद्व्रतम् । पृथिवी वा अन्नम् । आकाशो ऽन्नादः । पृथिव्या माकाशः प्रतिष्ठितः । आकाशे पृथिवीप्रतिष्ठिता । तदेतदन्न मन्ने प्रतिष्ठितम् । स य एत दन्न मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवा नन्नादो भवति । महान्भवतिप्रजया पशुभिर्ब्रह्मवर्चसेन । महा न्कीर्त्या ॥ ९ ॥

---

## ॥ दशमोऽनुवाकः ॥

॥ सदाचारप्रदर्शनादिकम् ॥

न कञ्चन वसतौ प्रत्याचक्षीत । तद्व्रतम् । तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षते । एतद्वै मुखतो ऽन्नगं राद्धम् । मुखतोऽस्माअन्नगं राध्यते । एतद्वै मध्यतो ऽन्नगं राद्धं । मध्यतोऽस्मा अन्नगं राध्यते । एतद्वा अन्ततो ऽन्नगं राद्धम् । अन्ततोऽस्माअन्नगं राध्यते ; य एवं वेद । क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गति रिति पादयोः । विमुक्ति रिति पायौ । इति मानुषी स्समाज्ञाः । अथ दैवीः । तृप्ति-रिति वृष्टौ । बल मिति विद्युति । यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजाति रमृत मानन्द इत्युपस्थे । सर्व मित्याकाशे । तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति । तन्मह इत्युपासीत । महा-

न्भवति । त न्मन इत्युपासीत । मानवान्भवति । त न्नम इत्युपासीत । नम्यन्तेँ ऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवा न्भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तं स्सपत्नाः । परियेँ ऽप्रियाँ भ्रातृव्याः । स य श्चायं पुरुषे । य श्चासा वादित्ये । स एकः । स यं एवंवित । अस्माल्लोका त्प्रेत्य । एत मन्नमय मात्मान-मुपसंक्रम्य । एतं प्राणमय मात्मान मुपसंक्रम्य । एतं मनोमय-मात्मान मुपसंक्रम्य । एतं विज्ञानमय मात्मान मुपसंक्रम्य । एत-मानन्दमय मात्मान मुपसंक्रम्य । इमान्लोका न्कामान्नी कामरूप्यं-नुसञ्चरन् । एत थ्साम गाय न्नास्ते । हा ३ वुहा ३ वुहा ३ वु । अहमन्न महमन्न महमन्नम् । अहमन्नादो ३ ऽहमन्नादो ३ ऽहम-न्नादः । अहग्ग्श्लोककृदहग्गं श्लोककृदहग्ग्श्लोककृत । अह मस्मि प्रथमजा ऋता ३ स्य । पूर्वं देवेभ्यो अमृतस्य ना ३ भायि । यो मा ददाति स इदेवमा ३ वाः । अह मन्नमन्न मदन्तमा ३ द्मि । अहं विश्वंभुवन मभ्यभवाम् । सुवर्णज्योतीः । य एवंवेद । इत्युपनिषत् ॥

### ॥ उत्तरशान्तिपाठः ॥

[1]सह ना ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीत मस्तु माविद्विषावहै । ओं शान्ति श्शान्ति-श्शान्तिः ॥

SANS 294.59218 TA-I

1. सहनावित्येतन्मात्रं द्राविडाः पठन्ति । भृगुस्त्रयोदशेत्यारभ्य नकञ्चनैक-षष्टिरित्यन्तन्तु पाठद्वयेपि समानम् । ततः "शंनश्शीक्षागूं सहनौयच्छन्दसां

IGNCA RAR ACC. No. R-734

भृगु स्त्रयोदश त्रं प्राणो मनो विज्ञानं द्वादश द्वादशा नन्दो दशा न्नं निन्द्या दन्नं न परिचक्षीतान्नं बहुकुर्वीत पृथिव्याकाश एकादशैकादश नकंचनैकं षष्टिर्दश ॥ १० ॥

हरिः ओम् ॥

तैत्तिरीयोपनिषदि तृतीयः प्रश्नस्समाप्तः ।

Indira Gandhi National
Centre for the Arts

भूस्सयः पृथिव्योमित्यृतं चाहं वेदमनूच्य शंनस्सहनाववतु ब्रह्म वेद्भृगुःपञ्च दश ॥ १५ ॥ शंनो मह इत्यादित्योनो इतराण्यसन्ने वो न्नं ननिन्द्या चतुश्चत्वारिंशत् ॥ ४४ ॥ इति द्राविडानां पाठः ॥

॥ श्रीः ॥

# ॥ तैत्तिरीयोपनिषदि ॥

## ॥ चतुर्थः प्रश्नः ॥

अथ नारायणोपनिषत् ।

---

## [1] ॥ द्राविडपाठः ॥

काण्डर्षिः=याज्ञिकीर्देवता उपनिषत् ।

---

अनुवाकाः ६४ ।

## ॥ पूर्वशान्तिपाठः ॥

Centre for the Arts

हरिः ओम् ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः ॥

---

## ॥ प्रथमोऽनुवाकः ॥

॥ ब्रह्मतत्त्वप्रतिपादकादिमन्त्राः ॥

हरिः ओम् । अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान् । शुक्रेण ज्योतीꣳषि समनुप्रविष्टः प्रजापतिश्चरति

1. अस्मिन्प्रश्ने, द्राविडान्ध्रभेदेन पाठक्रमो द्विधाऽस्ति । तत्र द्राविडपाठः प्रायशो भट्टभास्करभाष्यानुसारी । आन्ध्रपाठस्तु प्रायशो माधवीयभाष्यानुसारी ।

गर्भे अन्तः । यस्मि न्निदग्ं संचविचैति सर्वं यस्मि न्देवा अधिविश्व निषेदुः । त देव भूतं तदु भव्यं मा इदं तदक्षरे परमे व्योमन् । येनावृतं खं च दिवं महीं च येनादित्य स्तपति तेजसा भ्राजसा च । यमन्त स्समुद्रे कवयो वयन्ति य दक्षरे परमे प्रजाः । यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यससर्ज भूम्याम् । य दोषधीभिः पुरुषा न्पशूग्ं श्च विवेश भूतानि चराचराणि । अतःपरंनान्यदणीयसग्ंहि परात्परं यन्महतोमहान्तम् । यदेकमव्यक्त मनन्तरूपं विश्वं पुराणं तमसः परस्तात् ॥ १ ॥

तदेवर्तं तदुसत्य माहु स्तदेव ब्रह्म परमं कवीनाम् । इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायु स्तत्सूर्य स्तदु चन्द्रमाः । तदेव शुक्र ममृतं त द्ब्रह्म तदापस्स प्रजापतिः । सर्वे निमेषा जज्ञिरे विद्युतः पुरुषा दधि । कला मुहूर्ताः काष्ठा श्चाहोरात्राश्च सर्वशः । अर्धमासा मासा ऋतवस्संवत्सरश्च कल्पताम् । स आपः प्रदुघे उभेइमे अन्तरिक्ष मथो सुवः । नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् । न तस्येशे कश्चनतस्य नाम महद्यशः ॥ २ ॥

न संदृशे तिष्ठति रूप मस्य न चक्षुषा पश्यति कश्च नैनम् । हृदा मनीषा मनसा ऽभिक्लृप्तो य एनं विदु रमृता स्ते भवन्ति । " अद्भ्य स्सम्भूतो हिरण्यगर्भ " इत्यष्टौ । एष हि देवः प्रदिशो ऽनुसर्वाः पूर्वो हि जात स्स उ गर्भे अन्तः । स विजायमान स्स

जनिष्य माणꣳ प्रत्यङ्मुखा स्तिष्ठति विश्वतो मुखः । विश्वतश्चक्षु-रुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यां नमति सपतत्रै द्यावापृथिवी जनयं न्देव एकः । वेन स्तत्पश्य-न्विश्वा भुवनानि विद्वान् । यत्र विश्वं भवत्येकनीळम् । यस्मि न्निदꣳ सं चविचैकꣳ स ओतꣳ प्रोतं श्च विभुः प्रजासु । प्रतद्वोचे अमृतं नु विद्वान्गन्धर्वो नाम निहितं गुहासु ॥ ३ ॥

त्रीणि पदा निहिता गुहासु य स्त द्वेद सवितुꣳ पितासत् । स नो बन्धु र्जनिता स विधाता धामानि वेदभुवनानि विश्वा । यत्र देवा अमृत मानशाना स्तृतीये धामान्यभ्यैरयन्त । परिद्यावापृथिवी यन्ति सद्यꣳ परिलोका न्परिदिशः परिसुवः । ऋतस्य तन्तुं विततं विचृत्य तदपश्य त्तदभवत्प्रजासु । परीत्यलोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च । प्रजापतिꣳ प्रथमजा ऋतस्यात्मनाऽऽत्मान-मभिसंबभूव । सदसस्पति मद्भुतं प्रिय मिन्द्रस्य काम्यम् । सनिं मेधा मयासिषम् । उद्दीप्यस्वजातवेदोऽपघ्नन्निरृ ऋतिं मम ॥ ४ ॥

पशूꣳ श्च मह्य मावह जीवनं च दिशोदिश । मानोहिꣳसी-ज्जातवेदो गा मश्वं पुरुषं जगत् । अबिभ्र दग्न आगहि श्रिया मा परिपातय । पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रꣳ प्रचोदयात् । तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नोरुद्रः प्रचोदयात् । तत्पुरुषायविद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् । तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि ॥ ५ ॥

तन्नो गरुडः प्रचोदयात् । कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् । नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । सहस्रपरमादेवी शतमूला शताङ्कुरा । सर्वगूं हरतु मे पापं दूर्वा दुस्स्वप्ननाशनी । अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा । शिरसा धारितादेवि रक्षस्व मां पदेपदे । उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ॥ ६ ॥

भूमि र्धेनुर्धरणी लोकधारिणी । मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् । त्वया हतेन पापेन जीवामि शरदश्शतम् । मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीगूंसर्वभूतानां तामिहोपह्वये श्रियम् । हिरण्यशृङ्गंवरुणंप्रपद्ये तीर्थं मे देहि याचितः । यन्मया भुक्त मसाधूनां पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणावा दुष्कृतं कृतम् । तन्न इन्द्रो वरुणो बृहस्पति स्सविता च पुनन्तु पुनः पुनः ॥ ७ ॥

सुमित्रा न आप ओषधय स्सन्तु दुर्मित्रास्तस्मै भूयासुर्यो ऽस्मा न्द्वेष्टि यंच वयं द्विष्मः । नमोऽग्नये ऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः । य दपां क्रूरं य दमेध्यं य दशान्तं तदपगच्छतात् । अत्याशना दतीपाना द्य च्च उग्रा त्प्रतिग्रहात् । तन्मे वरुणो राजा पाणिना ह्यवमर्शतु । सोऽह मपापोविरजो निर्मुक्तो मुक्तकिल्बिषः । नाकस्य पृष्ठ मारुह्य गच्छे द्ब्रह्मसलोकताम् । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमगूंसचता परुष्णि

या । असिक्निया मरुद्वृधे वितस्तया ऽऽर्जीकीये शृणुह्यासुषोमया । ऋतं च सत्यं चाभीद्धा त्तपसो ऽध्यजायत ॥ ८ ॥

ततो रात्रि रजायत तत स्समुद्रो अर्णवः । समुद्रादर्णवा-दधिसंवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्यमिषतोवशी । सूर्याचन्द्रमसौ धाता यथापूर्व मकल्पयत् । दिवंचपृथिवींचा न्तरिक्ष-मथो सुवः । यत्पृथिव्यागं्ँ रजस्स्वमान्तरिक्षे विरोदसि । इमागूं-स्तदापो वरुणः पुनात्वघमर्षणः । एष भूतस्य भव्ये भुवनस्य गो-प्ता । एष पुण्यकृतांल्लोका नेष मृत्योर् हिरण्मयम् । द्यावापृथिव्योर् हिरण्मयगं् सग्ंश्रितगूं सुवः ॥ ९ ॥

स न स्सुव स्सगूं शिशाधि । आर्द्रं ज्वलति ज्योति रहमस्मि । ज्योति ज्वलति ब्रह्माहमस्मि । योऽह मस्मि ब्रह्माह मस्मि । अह-मस्मि ब्रह्माहमस्मि । अह मेवाहं मांजुहोमि स्वाहा । अकार्य कार्यवकीर्णीस्तेनो भ्रूणहा गुरुतल्पगः । वरुणो ऽपामघ मर्षण-स्तस्मा त्पापा त्प्रमुच्यते । रजोभूमि स्त्वमागूंरोदयस्व प्रवदन्तिधीराः । पुनन्तु ऋषयः पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः । आक्रान्त्समुद्रः प्रथमे विधर्मञ्जनय न्प्रजाभुवनस्य राजा ॥ १० ॥

वृषापवित्रे अधिसानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः । जातवेदसे सुनवाम सोम मरातीयतो नि(ज)दहातिवेदः । सनःपर् ष दतिदुर्गाणि विश्वा नावेव सिन्धुं दुरिता ऽत्यग्निः । तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीगूं शरण-

मह प्रपद्ये सुतरसि तरसे नमः । अग्ने त्वं पारया नव्यो अस्मान्थ्स्व-
स्तिभि रति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय
तनयाय शंयोः । विश्वानि नो दुर्गहा जातवेद स्सिन्धुं न नावा दुरि-
ताऽतिपर्षि । अग्ने अत्रिवन्मनसा गृणानो ऽस्माकं भूत्वविता
तनूनाम् । पृतना जितगूं सह मान मग्नि मुग्रगूं हुवेम परमाथ्सध-
स्थात् । स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ।
प्रत्नोषि कमीड्यो अध्वरेषु सना च होता नव्यश्च सत्सि । स्वां चाग्ने त-
नुवं पिप्रियस्वास्मभ्यं च सौभगमायजस्व ॥ १२ ॥

परस्ता द्यशो गुहासु मर्म सुवर्णपक्षाय धीमहि शतबाहुना पुनःपुन रजायत सुवो राजा सधस्थात् त्रीणि च ॥ १ ॥

Indira Gandhi National Centre for the Arts

## ॥ द्वितीयोऽनुवाकः ॥

### ॥ महाव्याहृतिहोममन्त्राः ॥

भू रग्नये पृथिव्यै स्वाहा भुवो वायवे ऽन्तरिक्षाय स्वाहा सुव-रादित्याय दिवे स्वाहा भूर्भुव स्सुवश्चन्द्रमसे दिग्भ्य स्स्वाहा नमो देवेभ्य स्स्वधा पितृभ्यो भूर्भुवस्सुवरोम् ॥ १२ ॥ २ ॥

---

## ॥ तृतीयोऽनुवाकः ॥

### ॥ अन्नसमृद्धिकामस्य होमार्थामन्त्राः ॥

भू रन्न मग्नये पृथिव्यै स्वाहा भुवो ऽन्नं वायवे ऽन्तरिक्षाय स्वाहा सुवरन्न मादित्याय दिवे स्वाहा भूर्भुवस्सुव रन्नं चन्द्रमसे

दिग्भ्य स्स्वाहा नमो देवेभ्यं स्स्वधापितृभ्यो भूर्भुव स्सुव रन्नमोम् ॥ १३ ॥ ३ ॥

—— ——

## ॥ चतुर्थोऽनुवाकः ॥

॥ पूजाकामस्यहोमार्थमन्त्राः ॥

भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चान्तरिक्षाय च महतेच स्वाहा सुव रादित्याय च दिवे चमहते च स्वाहा भूर्भुवस्सुव श्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महतेच स्वाहा नमो देवेभ्यं स्स्वधा पितृभ्यो भूर्भुव स्सुवर्मह रोम् ॥ १४ ॥ ४ ॥

—•—

## ॥ पञ्चमोऽनुवाकः ॥

॥ मुमुक्षोः ज्ञानप्राप्त्यर्थहोममन्त्राः ॥

पाहिनो अग्न एनसेस्वाहा पाहिनोविश्ववेदसे स्वाहा यज्ञं पाहि विभावसो स्वाहा सर्वं पाहि शतक्रतो स्वाहा ॥ १५ ॥ ५ ॥

———

## ॥ षष्ठोऽनुवाकः ॥

॥ ज्ञानार्थिना जप्यः मन्त्रः ॥

य श्छन्दसा मृषभो विश्वरूप श्छन्दोभ्य श्छन्दाग्ं स्याविवेश । सताग्ं शिक्यः प्रोवाचोपनिष दिन्द्रो ज्येष्ठ इन्द्रियायऋषिभ्योनमो देवेभ्यं स्स्वधा पितृभ्यो भूर्भुवस्सुव रोम् ॥ १६ ॥ ६ ॥

———

## ॥ सप्तमोऽनुवाकः ॥

॥ लब्धवेदानामविस्मरणाय जप्यो मन्त्रः ॥

नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं माच्योढ्वं ममामुष्य ओम् ॥ १७ ॥ ७ ॥

---

## ॥ अष्टमोऽनुवाकः ॥

॥ श्रौतस्मार्तादिसर्वकर्मणां तपोरूपेण प्रशंसारूपो मन्त्रः ॥

ऋतं तपस्सत्यं तपश्श्रुतं तपश्शान्तं तपो दानं तपो यज्ञस्तपो भूर्भुवस्सुवर्ब्रह्मैतदुपास्वैतत्तपः ॥ १८ ॥ ८ ॥

---

Indira Gandhi National

## ॥ नवमोऽनुवाकः ॥

॥ विहिताचरण प्रशंसापूर्वकं निषिद्धाचरणस्य निंदा ॥

यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति यथाऽसिधारां कर्तेऽवहितामवक्रामेद्यद्युवेयुवेह वा विह्वलिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत् ॥ १९ ॥ ९ ॥

---

## ॥ दशमोऽनुवाकः ॥

॥ तत्त्वोपदेशरूपमन्त्राः ॥

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमान-

मीशम् । सप्त प्राणाः प्रभवन्ति तस्मा॑थ्सप्तार्चिष॑स्समिध॑ स्सप्तजिह्वाः । सप्त इमे लोका येषु चरन्ति प्राणा गुहाशयांनिहिता स्सप्तसप्त । अतः समुद्रा गिरयश्च सर्वेऽस्माथ्स्यन्दन्ते सिन्धव स्सर्व रूपाः । अतश्च विश्वा ओषधयोरसाश्च येनैष भूत स्तिष्ठत्यन्तरात्मा । ब्रह्मा देवानां पदवीः कवीना मृषिर्विप्राणां महिषोमृगाणाम् । श्येनो गृध्राणाग्ं स्वधितिर्वनानाग्ं सोमः पवित्र मत्येति रेभन् । अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीग्ं सरूपाम् । अजो ह्येको जुषमाणोऽनु शेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ २० ॥

हग्ंस श्शुचिष द्वसु रन्तरिक्षसद्धोता वेदिष दतिथि दुरोण सत् । नृष द्वर सदृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । यस्मा ज्जाता न परा नैव किंच नास य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया संविदान स्त्रीणिज्योतीग्ंषि सचते स षोडशी । विधर्तारग्ं हवामहे वसोः कुविद्वनाति नः । सवितारं नृचक्षसम् । अद्या नो देव सावितः प्रजावथ्सावी स्सौभगम् । परा दुष्वप्नियग्ं सुव । विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्म आसुव ॥ २१ ॥

मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वी र्नस्सन्त्वोषधीः । मधु नक्त मुतोषसि मधुम त्पार्थिवग्ं रजः । मधु द्यौ रस्तुनः पिता । मधुमान्नो वनस्पति र्मधुमाग्ं अस्तु सूर्यः । माध्वी र्गावो भवन्तु नः । घृतं मिमिक्षेघृत मस्य योनि र्घृते श्रितो घृत

मुवस्य धाम । अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यम् । समुद्रा दूर्मिर्मधुमागूं उदार दुपागूं शुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवाना ममृतस्य नाभिः ॥ २२ ॥

वयं नाम प्रब्रवामा घृतेनास्मिन् यज्ञे धारयामानमोभिः । उपब्रह्मा शृणुवच्छस्यमानं चतुश्शृङ्गोऽवमीद्गौर एतत् । चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवोमर्त्यागूं आविवेश । त्रिधा हितं पणिभि गुह्यमानं गविदेवासो घृत मन्वविन्दन् । इन्द्र एकगूं सूर्य एकं जजान वेनादेकग्गूं स्वधया निष्टतक्षुः । यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानगूं सनो देवश्शुभया स्मृत्या संयुनक्तु । यस्मा त्परं नापरमस्ति किंचिद्यस्मा न्नाणीयो न ज्यायो ऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ २३ ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व मानशुः । परेण नाकं निहितं गुहायां विभ्राजते यद्यतयोविशन्ति । वेदान्तविज्ञानसुनिश्चितार्था स्संन्यासयोगा द्यतयश्शुद्धसत्वाः । ते ब्रह्मलोके तु परान्तकाले परामृता त्परिमुच्यन्ति सर्वे । दहरं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसगूंस्थम् । तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम् । यद्वेदादौ स्वरः प्रोक्तो वेदान्तेच प्रतिष्ठितः । तस्य प्रकृतिलीनस्य य पर स्स महेश्वरः ॥ २४ ॥

अजो॑ऽन्य स्सुव नाभि स्सर्वे॒ म॒ष्टौ च॑ ॥ १० ॥

---

## ॥ एकादशोऽनुवाकः ॥

॥ परमात्मगुणविशेषप्रतिपादनम् ॥

सहस्रशीर्॑षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देव मक्षरं परमं प्रभुम् । विश्वतः परमं नित्यं विश्वं नारायणगं हरिम् । विश्व मेवेदं पुरुषस्त द्विश्वमुपजीवति । पतिं विश्वस्यात्मेश्वरगं शाश्वतगं शिव मच्युतम् । नारायणं महाज्ञेयं विश्वात्मानंपरायणम् । नारायणपरंब्रह्मतत्त्वं नारायणः परः । नारायण परो ज्योतिरात्मानारायणः परः । य च्च किंचिज्जगत्यस्मिन्दृश्यते॑ श्रूयतेऽपिवा । अन्त र्बहि श्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ २५ ॥

अनन्त मव्ययं कविगं समुद्रेऽन्तं विश्वशम्भुवम् । पद्मकोशप्रतीकाशगं हृदयं चाप्यधोमुखम । अधो निष्ट्या वितस्त्यां तु नाभ्यामुपरि तिष्ठति । हृदयं त द्विजानीयाद्विश्वस्यायतनं महत् । सन्ततगं सिराभिस्तु लम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरगं सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम् । तस्य मध्ये महा नग्नि विश्वार्चि र्विश्वतो मुखः । सोऽग्रभु ग्विभजन्तिष्ठ न्नाहार मजरः कविः । संतापयति स्वं देहमापादतलमस्तकम् । तस्य मध्ये वह्निशिखा अणीयो॑र्ध्वा व्यवस्थितः। नीलतो यदमध्यस्था विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी

पीताभा स्या त्तनूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्मा स शिव स्सेन्द्रः सो ऽक्षरः परमस्स्वराट् ॥ २६ ॥

नारायण स्स्थितो व्यवस्थित श्चत्वारिंच ॥ ११ ॥

---

## ॥ द्वादशोऽनुवाकः ॥

॥ उपास्यदेवतानमस्कारः ॥

ऋतगं सत्यं परंब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वैनमः ॥ २७ ॥ १२ ॥

---

## ॥ त्रयोदशोऽनुवाकः ॥

आदित्यो वा एष एत न्मण्डलं तपति तत्र ता ऋच स्तदृचां मण्डलंगं स ऋचां लोको ऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां मण्डलंगं स साम्नांलोकोऽथ य एष एतस्मि न्मण्डलेऽर्चिषि पुरुषस्तानि यजूंषि सयजुषां मण्डलंगं सयजुषां लोकस्सैषा त्रय्येवं विद्यातंपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः॥ २८ ॥ १३ ॥

---

## ॥ चतुर्दशोऽनुवाकः ॥

॥ पूर्वोक्तस्यैव विवरणम् ॥

आदित्यो वै तेज ओजो बलं यश श्चक्षु श्श्रोत्रं मात्मामनो मन्यु र्मनु र्मृत्यु रसत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं

कं तथ्सत्य मन्नमायु रमृतो जीवो विश्वः कतम स्स्वयंभुः प्रजापति-
स्संवथ्सरइति संवथ्सरो ऽसावादित्यो य एष पुरुष एष भूताना
मधिपतिर्ब्रह्मणस्सायुज्यगं सलोकता माप्नोत्येतासा मेवदेवतानागं
सायुज्यगं सार्ष्टितागं समानलोकतामाप्नोति य एवं वेदेत्युपनिषत्
॥ २९ ॥ १४ ॥

---

## ॥ पञ्चदशोऽनुवाकः ॥

॥ उपासनासमर्थस्य जप्यः मन्त्रः ॥

घृणि स्सूर्य आदित्यो मर्चयन्ति तप स्सत्यं मधुक्षरन्ति
तद्ब्रह्म तदाप आपो ज्योति रसो ऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥
३० ॥ १५ ॥

Indira Gandhi National
Centre for the Arts

---

## ॥ षोडशोऽनुवाकः ॥

॥ त्वरितरुद्रनामानुवाकः ॥

सर्वो वै रुद्र स्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्र-
स्सन्महो नमोनमः । विश्वं भूतं भुवनं चित्रं बहुधाजातं जायमानं
च यत् । सर्वो ह्येष रुद्र स्तस्मै रुद्राय नमो अस्तु ॥ ३१ ॥ १६ ॥

## ॥ सप्तदशोऽनुवाकः ॥

॥ रुद्रदेवताकमन्त्रः ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेमशंतमगं हृदे ।
सर्वोह्येषरुद्रस्तस्मै रुद्राय नमोअस्तु ॥ ३२ ॥ १७ ॥

## ॥ अष्टादशोऽनुवाकः ॥

॥ रुद्रदेवताकमन्त्रः ॥

नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये नमोनमः ॥ ३३ ॥ १८ ॥

---

## ॥ एकोनविंशोऽनुवाकः ॥

॥ अग्निहोत्रहवण्याः उपयुक्तस्य वृक्षविशेषस्याभिधानम् ॥

यस्य वैकङ्कत्यग्निहोत्रहवणी भवति प्रतिष्ठिता॰ प्रत्येवास्याहुतय स्तिष्ठन्त्यथो प्रतिष्ठित्यै ॥ ३४ ॥ २९ ॥

---

## ॥ विंशोऽनुवाकः ॥

॥ रक्षोघ्नमन्त्र प्रतीकोभिधानम् ॥

कृणुष्वपाज इति पञ्च ॥ ३५ २० ॥

---

## ॥ एकविंशोऽनुवाकः ॥

॥ भूदेवताकमन्त्रः ॥

अदिति र्देवा गन्धर्वा मनुष्याः पितरोऽसुरा स्तेषाग्ं सर्वभूतानां माता मेदिनी महती मही सावित्री गायत्रीजगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमा कायासा सत्येत्यमृतेति वसिष्ठः ॥ ३६ ॥ २१ ॥

---

## ॥ द्वाविंशोऽनुवाकः ॥

॥ जलदेवताकमन्त्रः ॥

आपोवा इदगूं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽमृत मापोऽन्न माप स्सम्राडापो विराडापस्स्वराडाप श्छन्दागूं स्यापो ज्योतीगूंष्याप स्सत्य माप स्सर्वा देवता आपो भू र्भुव स्सुव-राप ओम् ॥ ३७ ॥ २२ ॥

---

## ॥ त्रयोविंशोऽनुवाकः ॥

॥ मध्याह्नसन्ध्यांगाभिमन्त्रितजलपानम् ॥

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पति र्ब्रह्म पूता पुनातु माम् । यदुच्छिष्ट मभोज्यं यद्वा दुश्च-रितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहगूं स्वाहा ॥ ३८ ॥ २३ ॥

---

## ॥ चतुर्विंशोऽनुवाकः ॥

॥ 1सायंसन्ध्यांगजलपानम् ॥

अग्नि श्च मा मन्यु श्च मन्युपतय श्च मन्यु कृतेभ्यः । पापेभ्यो रक्षन्ताम् । यदह्ना पाप मकार्षम् । मनसा वाचाहस्ता-भ्याम् । पद्भ्या मुदरेण शिश्ना । अह स्त दवलुम्पतु । यत्किंच

---

1. मन्त्रसङ्ख्यानविषये भट्टभास्कर माधवाचार्ययोः भेदो विद्यते ॥

दुरितं मयि । इदमहं मा ममृतयोनौ । सत्ये ज्योतिषि जुहोमि स्वाहा ॥ ३९ ॥ २४ ॥

---

## ॥ पञ्चविंशोऽनुवाकः ॥

॥ प्रातस्सन्ध्याकालजलपानम् ॥

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यद्रात्रिया पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । रात्रिस्तदवलुम्पतु । यत्किञ्च दुरितं मयि इदमहं मा ममृतयोनौ । सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ४० ॥ २५ ॥

---

## ॥ षड्विंशोऽनुवाकः ॥

॥ 2गायत्र्यावाहनम् ॥

आयातु वरदा देव्यक्षरं ब्रह्म सम्मितम् । गायत्रीं छन्दसां मातेदं ब्रह्मजुषस्व नः । ओजोऽसि । सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामासि विश्वमसि विश्वायुस्सर्वमसि सर्वायुरभिभूरों गायत्रीमावाहयामि ॥ ४१ ॥ २६ ॥

---

## ॥ सप्तविंशोऽनुवाकः ॥

॥ प्राणायाममन्त्रः ॥

ओं भूः । ओं भुवः । ओगं सुवः । ओं महः । ओं जनः । ओं तपः । ओगं सत्यम् । ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धी-

I' 2. मन्त्रसंख्यानविहये भट्टभास्कर माधवाचार्ययोः भेदो विद्यते ॥

महि । धियो योनः॰ प्रचोदयात् । ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुव सुवरोम् ॥ ४२ ॥ २७ ॥

---

## ॥ अष्टाविंशोऽनुवाकः ॥

### ॥ प्राणायाममन्त्रान्तरम् ॥

ओं भू र्भुव स्सुव र्महर्जन स्तप स्सत्यं तद्ब्रह्म तदाप आपो ज्योतीरसोऽमृतं ब्रह्म भू र्भुव स्सुवरोम् ॥ ४३ ॥ २८ ॥

---

## ॥ एकोनत्रिंशोऽनुवाकः ॥

### ॥ प्राणायाममन्त्रान्तरम् ॥

ओं त द्ब्रह्म । ओं त द्वायुः । ओं त दात्मा । ओं तथ्सत्यम् । ओं तथ्सर्वम् । ओं त त्पुरो र्नमः ॥ ४४ ॥ २९ ॥

Indira Gandhi National Centre for the Arts

---

## ॥ त्रिंशोऽनुवाकः ॥

### ॥ गायत्रीविसर्जनमन्त्रः ॥

उत्तमे शिखरेदेवि भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्योह्यनुज्ञानं गच्छदेवि यथासुखम् ॥ ४५ ॥ ३० ॥

---

## ॥ एकत्रिंशोऽनुवाकः ॥

### ॥ ब्रह्मोपस्थानम् ॥

ओं मन्त श्चरति भूतेषु गुहायां विश्वमूर्तिषु । त्वंयज्ञ-स्त्वंविष्णु स्त्वंवषट्कार स्त्वगुंरुद्र स्त्वं ब्रह्मा त्वंप्रजापतिः ॥४६॥३१॥

## ॥ द्वात्रिंशोऽनुवाकः ॥

॥ अपांप्राशनमन्त्रः ॥

अमृतोपस्तरण मसि ॥ ४७ ॥ ३२ ॥

---

## ॥ त्रयस्त्रिंशोऽनुवाकः ॥

॥ प्राणाहुतिमन्त्रः ॥

प्राणे निविष्टो ऽमृतं जुहोमि । प्राणायस्वाहा । अपाने निविष्टो ऽमृतं जुहोमि । अपानायस्वाहा । व्याने निविष्टो ऽमृतं जुहोमि । व्यानायस्वाहा । उदाने निविष्टो ऽमृतं जुहोमि । उदानाय स्वाहा । समाने निविष्टो ऽमृतं जुहोमि । समानाय स्वाहा । ब्रह्मणिम आत्मा ऽमृतत्वाय ॥ ४८ ॥ ३३ ॥

Indira Gandhi National
Centre for the Arts

---

## ॥ चतुस्त्रिंशोऽनुवाकः ॥

॥ प्राणाहुत्यर्थं विकल्पिता मन्त्राः ॥

प्राणे निविष्टो ऽमृतं जुहोमि । शिवो मा ऽऽविशाप्रदाहाय । प्राणाय स्वाहा । अपाने निविष्टो ऽमृतं जुहोमि । शिवो माऽऽविशा प्रदाहाय । अपानाय स्वाहा । व्याने निविष्टो ऽमृतं जुहोमि । शिवो मा ऽऽविशाप्रदाहाय । व्यानाय स्वाहा । उदाने निविष्टो ऽमृतं जुहोमि । शिवोमाऽऽविशाप्रदाहाय । उदानाय स्वाहा । समाने निविष्टो ऽमृतं जुहोमि । शिवो मा ऽऽविशाप्रदाहाय । समानाय स्वाहा । ब्रह्मणि म आत्मा ऽमृतत्वाय ॥ ४९ ॥ ३४ ॥

---

## ॥ पञ्चत्रिंशोऽनुवाकः ॥

॥ भोजनादूर्ध्वं अपां प्राशनमन्त्रः ॥

अमृतापिधान मसि ॥ ५० ॥ ३५ ॥

---

## ॥ षट्त्रिंशोऽनुवाकः ॥

॥ भुक्तानुमन्त्रणमन्त्राः ॥

श्रद्धायां प्राणे निविश्यामृतगं हुतं प्राणमन्नेनाप्यायस्व । अपाने निविश्यामृतगं हुत मपानमन्नेनाप्यायस्व । व्याने निविश्यामृतगं हुतं व्यानमन्नेनाप्यायस्व । उदाने निविश्यामृतगं हुत मुदान मन्नेनाप्यायस्व । समाने निविश्यामृतगं हुतगं समान मन्नेनाप्यायस्व । ब्रह्मणिम आत्मा ऽमृतत्वाय ॥ ५१ ॥ ३६ ॥

Indira Gandhi National
Centre for the Arts

---

## ॥ सप्तत्रिंशोऽनुवाकः ॥

॥ हृदयाभिमर्शनमन्त्रः ॥

प्राणानां ग्रन्थिरसि रुद्रोमाऽऽविशान्तकस्तेनान्ने नाप्ययस्व ॥ ५२ ॥ ३७ ॥

---

## ॥ अष्टत्रिंशोऽनुवाकः ॥

॥ जीवात्मनोरनुसंधानमन्त्रः ॥

अङ्गुष्ठमात्रः पुरुषो ऽङ्गुष्ठं च समाश्रितः । ईश स्सर्वस्यजगतः प्रभुः प्रीणाति विश्वभुक् ॥ ५३ ॥ ३८ ॥

---

## ॥ एकोनचत्वारिंशोऽनुवाकः ॥

॥ मेधाभिमानदेवताप्रार्थनमन्त्रौ ॥

मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना । त्वया जुष्टा जुषमाणा दुरुक्तान्बृहद्वदेम विदथे सुवीराः । त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया । त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणेन मेधे ॥ ५४ ॥ ३९ ॥

---

## ॥ चत्वारिंशोऽनुवाकः ॥

॥ मेधाप्रदेन्द्रादिदेवताप्रार्थनमन्त्रः ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभा वाधत्तां पुष्करस्रजा ॥ ५५ ॥ ४० ॥

Indira Gandhi National Centre for the Arts

---

## ॥ एकचत्वारिंशोऽनुवाकः ॥

॥ मेधाप्रदो मन्त्रान्तरः ॥

अप्सरासु या मेधा गन्धर्वेषु च यन्मनः । दैवीं मेधा मनुष्यजा सा मां मेधा सुरभिर्जुषताम् ॥ ५६ ॥ ४१ ॥

---

## ॥ द्विचत्वारिंशोऽनुवाकः ॥

॥ मेधाप्रदो मन्त्रान्तरः ॥

आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषताम् ॥ ५७ ॥ ४२ ॥

---

## ॥ त्रिचत्वारिंशोऽनुवाकः ॥

॥ महादेवपश्चिमवक्त्रप्रतिपादकमन्त्रः ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमः । भवेभवेनातिभवे भजस्वमां भवोद्भवाय नमः ॥ ५८ ॥ ४३ ॥

---

## ॥ चतुश्चत्वारिंशोऽनुवाकः ॥

॥ उत्तरवक्त्रप्रतिपादकमन्त्रः ॥

वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनायनमः ॥ ५९ ॥ ४४ ॥

---

Indira Gandhi National Centre for the Arts

## ॥ पञ्चचत्वारिंशोऽनुवाकः ॥

॥ दक्षिणवक्त्रप्रतिपादकमन्त्रः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यस्सर्वतश्शर्व सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ ६० ॥ ४५ ॥

---

## ॥ षट्चत्वारिंशोऽनुवाकः ॥

॥ प्राग्वक्त्रप्रतिपादकमन्त्रः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ६१ ॥ ४६ ॥

---

## ॥ सप्तचत्वारिंशोऽनुवाकः ॥

॥ ऊर्ध्ववक्त्रप्रतिपादकमन्त्रः ॥

ईशान स्सर्वविद्याना मीश्वर स्सर्वभूताना ब्रह्माधिपतिर्ब्रह्मणोऽधिपति ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ ६२ ॥ ४७ ॥

---

## ॥ अष्टचत्वारिंशोऽनुवाकः ॥

॥ त्रिसुपर्णमन्त्रः ॥

ब्रह्म मेतु माम् । मधु मेतु माम् । ब्रह्ममेव मेधु मेतु माम् । या स्ते सोम प्रजा वथ्सो ऽभि सो अहम् । दुस्वप्नहन्दुरुष्वहा । यास्ते सोम प्राणागं स्ता ञ्जुहोमि । त्रिसुपर्ण मयाचितं ब्राह्मणाय दद्यात् । ब्रह्म हत्यांवा एते घ्नन्ति । ये ब्राह्मणा स्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रा त्पंक्तिं पुनन्ति । ओम् ॥ ६३ ॥ ४८ ॥

---

## ॥ एकोनपञ्चाशोऽनुवाकः ॥

॥ त्रिसुपर्णमन्त्रः ॥

ब्रह्म मेधया । मधुमेधया । ब्रह्ममेव मधुमेधया । अद्या नो देव सवितः प्रजावत्सावी स्सौभगम् । परादुष्वप्नियगं सुव । विश्वानि देव सवित र्दुरितानि परा सुव । यद्भद्रं तन्मआसुव । मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वी र्नस्सन्त्वोषधीः । मधुनक्त मुतोषसि मधुम त्पार्थिवगं रजः ॥ ६४ ॥

---

मधु द्यौ रस्तु नः पिता । मधुमान्नोवनस्पति र्मधुमागूं अस्तु सूर्यः । माध्वी र्गावो भवन्तु नः । य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । भ्रूणहत्यां वा एते घ्नन्ति । ये ब्राह्मणा स्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रा त्पंक्तिं पुनन्ति । ओम् ॥ ६५ ॥

रजो नवंच ॥ ४९ ॥

## ॥ पञ्चाशोऽनुवाकः ॥

### ॥ त्रिसुपर्णमन्त्राः ॥

ब्रह्ममेधवा । मधुमेधवा । ब्रह्ममेव मधुमेधवा । ब्रह्मादेवानां पदवीः कवीना मृषि र्विप्राणां महिषोमृगाणाम् । श्येनो गृध्राणागूं स्वधिति र्वनानागूं सोमः पवित्रमत्येति रेभन्न् । हगूंस श्शुचिष द्वसु-रन्तरिक्षस द्धोता वेदिषदतिथि र्दुरोणसत् । नृष द्वरस दृतस-द्व्योमस दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । य इमं त्रिसुपर्ण-मयाचितं ब्राह्मणाय दद्यात् । वीरहत्यां वा एते घ्नन्ति । ये ब्राह्मणा-स्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रा त्पंक्तिंपुनन्ति । ओम् ॥ ६६ ॥ ५० ॥

## ॥ एकपञ्चाशोऽनुवाकः ॥

### ॥ स्वावयवशुद्ध्यर्थहोममन्त्रः ॥

प्राणापानव्यानोदानसमाना मेशुध्यन्तां ज्योति रहंविरजा विपाप्मा भूयासगूं स्वाहा ॥ ६७ ॥ ५१ ॥

## ॥ द्विपञ्चाशोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

वाङ्मनश्चक्षुश्श्रोत्र जिह्वाघ्राणरेतो बुध्याकूतिस्सङ्कल्पा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ं स्वाहा ॥ ६८ ॥ ५२ ॥

## ॥ त्रिपञ्चाशोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

शिरः पाणिपादपार्श्वपृष्ठोदरजङ्घ शिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ं स्वाहा ॥ ६९ ॥ ५३ ॥

## ॥ चतुःपञ्चाशोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

त्वक्चर्ममाग्ंसरुधिरमेदोऽस्थिमज्जा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ं स्वाहा ॥ ७० ॥ ५४ ॥

## ॥ पञ्चपञ्चाशोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ं स्वाहा ॥ ७१ ॥ ५५ ॥

## ॥ षट्पञ्चाशोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

पृथिव्यप्तेजोवाय्वाकाशा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ं स्वाहा ॥ ७२ ॥ ५६ ॥

## ॥ सप्तपञ्चाशोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्तां ज्योति रहं विरजा विपाप्मा भूयासग्ं स्वाहा ॥ ७३ ॥ ५७ ॥

---

## ॥ अष्टपञ्चाशोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

विविट्ट्यै स्वाहा ॥ ७४ ॥ ५८ ॥

---

## ॥ एकोनषष्टितमोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

Indira Gandhi National Centre for the Arts

घषोत्काय स्वाहा ॥ ७५ ॥ ५९ ॥

---

## ॥ षष्टितमोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

उत्तिष्ठ पुरुष हरे लोहित पिङ्गलाक्षि देहिदेहि ददापयिता मे शुध्यन्तां ज्योति रहं विरजा विपाप्मा भूयासग्ंस्वाहा ॥ ७६ ॥ ६० ॥

---

## ॥ एकषष्टितमोऽनुवाकः ॥

॥ तच्छेषमन्त्रः ॥

ओग्ं स्वाहा ॥ ७७ ॥ ६१ ॥

## ॥ द्विषष्टितमोऽनुवाकः ॥

### ॥ ज्ञानसाधनाभिधानम् ॥

सत्यं परं परगूं सत्यगं सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सताग्ं हि सत्यं तस्मात्सत्ये रमन्ते तप इति तपो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं तद्दुराधर्षं तस्मात्तपसि रमन्ते दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमन्ते शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते दानमिति सर्वाणि भूतानि प्रशगूंसन्ति दानान्नातिदुष्करं तस्माद्दाने रमन्ते धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नातिदुश्चरं तस्माद्धर्मे रमन्ते प्रजन इति भूयागंसस्तस्माद्भूयिष्ठाः प्रजायन्ते तस्माद्भूयिष्ठाः प्रजनने रमन्तेऽग्नय इत्याह तस्मादग्नय आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमन्ते यज्ञ इति यज्ञो हि देवानां यज्ञेन हि देवा दिवं गतास्तस्माद्यज्ञे रमन्ते मानसमिति विद्वागंसस्तस्माद्विद्वागूंस एव मानसे रमन्ते न्यास इति ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि तपागंसि न्यास एवात्यरेचयद्य एवं वेदेत्युपनिषत् ॥ ७८ ॥ ६२ ॥

---

## ॥ त्रिषष्टितमोऽनुवाकः ॥

### ॥ मोक्षसाधनसमूहोपपादनभूताख्यायिकादिकम् ॥

प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं

तस्मा ᳚त्सत्यं परमं वदन्ति तपसा देवा देवता मग्र आय न्तपसर्षय-
स्सुवरन्वविन्दन्तपसा सपत्नान्प्रणुदामारातिगूं स्तपसि सर्वं प्रतिष्ठितं
तस्मा त्तपः परमंवदन्ति दमेन दान्ताः किल्बिष मवधून्वन्ति दमेन
ब्रह्मचारिण स्सुवरगच्छन्दमोभूतानां दुराधुर्षं दमे सर्वं प्रतिष्ठितं
तस्मा द्दमः परमं वदन्ति शमेन शान्ता श्शिव माचरन्तिशमेन नाकं
मुनयोऽन्व विन्दञ्छमो भूतानां दुराधर्षगूंशमे सर्वं प्रतिष्ठितं तस्मा-
च्छमः परमं वदन्ति दानं यज्ञानां वरूथं दक्षिणालोके दातारगूं सर्व-
भूतान्युपजीवन्ति दानेनारातीरपानुदन्तदानेन द्विषन्तो मित्रा भवन्ति-
दानेसर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति धर्मो विश्वस्य जगतः
प्रतिष्ठा लोकेधर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं
प्रतिष्ठितं तस्माऽद्धर्मं परमं वदन्ति प्रजननंवै प्रतिष्ठा साधुप्रजायाग्ं
स्तन्तुं तन्वानः पितृणा मनृणो भवति तदेव तस्यानृणंतस्मा त्प्रजननं
परमं वदन्त्यग्नयो वै त्रयी विद्यादेवयानः पन्था गार्हपत्य ऋक्पृथिवी-
रथन्तर मन्वाहार्यपचनो यजु रन्तरिक्षं वामदेव्य माहवनीय स्साम
सुवर्गोलोको बृहत्तस्मा दग्नी न्परमं वदन्त्यग्निहोत्रगूं सायंप्रातर्गृहाणां
निष्कृति स्स्विष्टगूं सुहुतं यज्ञक्रतूनां प्रायणगूं सुवर्गस्य लोकस्य ज्योति
स्तस्मा दग्निहोत्रं परमं वदन्ति यज्ञ इति यज्ञो हि देवानां यज्ञेन हि
देवा दिवंगता यज्ञेनासुरानपानुदन्त यज्ञेन द्विषन्तो मित्रा भवन्ति
यज्ञेसर्वं प्रतिष्ठितं तस्मा द्यज्ञं परमं वदन्ति मानसं वै प्राजापत्यं
पवित्रं मानसे न मनसा साधु पश्यति मानसा ऋषयः प्रजा असृ-

जन्त मानसे सर्वं प्रतिष्ठितं तस्मा न्मानसं परमं वदन्ति न्यास
इत्याहुर्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः कतम स्स्वयंभुः प्रजापति स्संव-
थ्सर इति संवथ्सरोऽसावादित्यो यएष आदित्ये पुरुष स्स परमेष्ठी
ब्रह्मात्मा याभिरादित्य स्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति
पर्जन्येनौषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभि रन्नं भवत्य-
न्नेन प्राणा प्राणैर्बलं बलेन तप स्तपसा श्रद्धा श्रद्धया मेधा मेधया
मनीषा मनीषया मनो मनसा शान्ति श्शान्त्या चित्तं चित्तेन स्मृतिरगूं
स्मृत्या स्मारगूं स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं दद-
न्थ्सर्वाण्येतानि ददात्यन्ना त्प्राणा भवन्ति भूतानां प्राणै र्मनो मन-
सश्च विज्ञानं विज्ञाना दानन्दो ब्रह्मयोनि स्स वा एष पुरुषः पञ्चधा
पञ्चात्मा येन सर्व मिदं प्रोतं पृथिवी चा न्तरिक्षं च द्यौश्च दिश श्चावा-
न्तरदिशा श्च स वै सर्व मिदंजग त्सच भूतग्ं स भव्यं जिज्ञासक्लृ-
प्तऋतजा रयिष्ठा श्श्रद्धा सत्यो मह स्वान्तमसोपरिष्टात्ज्ञात्वा तमेवं
मनसा हृदा च भूयो न मृत्यु मुपयाहि विद्वा न्तस्मा न्न्यासमेषां-
तपसा मतिरिक्त माहुः । वसुरण्वो विभूरसि प्राणे त्व मसि संधाता
ब्रह्म न्त्वमसि विश्वसृत्तेजोदा स्त्व मस्यग्ने र्वर्चोदा स्त्वमसि सूर्यस्य
द्युम्नोदास्त्व मसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वामहस ओ-
मित्यात्मानं युञ्जीतैतद्वै महोपनिषदं देवानां गुह्यं य एवं वेद ब्रह्मणो
महिमानमाप्नोति तस्मा द्ब्रह्मणो महिमान मित्युपनिषत् ॥
७९ ॥ ६३ ॥

## ॥ चतुष्षष्टितमोऽनुवाकः ॥

॥ आत्मयज्ञाभिधानम् ॥

तस्यैवं विदुषो यज्ञस्यात्मा यजमान श्श्रद्धापत्नी शरीर मिध्ममुरो वेदिर्लोमानि बर्हिर्वेद श्शिखाहृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्नि श्शमयिता दक्षिणावाग्घोता प्राण उद्गाता चक्षु रध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीत् यावद्ध्रियते सा दीक्षा य दश्नाति य त्पिबति त दस्यसोमपानं य द्रमते त दुपसदो यथ्संचर त्युपविश त्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं त दाहवनीयो य दस्य विज्ञानं तज्जुहोति यथ्सायं प्रात रत्ति त थ्समिधो यथ्सायं प्रातर्मध्यन्दिनं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवथ्सराश्च परिवथ्सराश्चते ऽहर्गणास्सर्ववेदसं वा एत थ्सत्त्रं यन्मरणं त दवभृथ एतद्वै जरामर्य मग्निहोत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छत्येतौ वै सूर्याचन्द्रमसो महिमानौ ब्राह्मणो विद्वानभिजयति तस्मा द्ब्रह्मणो महिमानमाप्नोति तस्मा द्ब्रह्मणो महिमानमित्युपनिषत् ॥ ८० ॥

अम्भसि भूरग्नये भूरन्नं भूरग्नयेच पाहिनो यश्छन्दसां नमो-ब्रह्मण ऋतं तपो यथावृक्षस्याणोरणीया न्थ्सहस्रशीर्षमृत मादित्यो वा एष आदित्योवै तेज ओजो घृणि स्सर्वोवै कद्रुद्राय नमो हिरण्य-

बाहवे यस्यवैकङ्कती कृणुष्वपाजो ऽदितिं रापोवा इद मापः पुनन्त्व-
ग्निश्च सूर्यश्चा यत्वों भूरों भूर्भुवस्सुवरों तदुत्तम ओमन्तश्चरत्यमृ-
तोपस्तरणं प्राणे निविष्टः प्राणे निविष्टश्शिवोऽमृता पिधानग्गं श्रद्धा
यां प्राणे निविश्य प्राणाना मङ्गुष्ठमात्रो मेधा देवी मेधांम इन्द्रो
ददात्वप्सरास्वा मां मेधा सद्यो वामदेवाया घोरेभ्य स्तत्पुरुषाये-
शानो ब्रह्ममेतु ब्रह्ममेधया ब्रह्ममेधवा प्राणापानवाङ्मन श्शिरःपाणि-
त्वक्चर्म शब्दस्पर्श पृथिव्यन्नमय विविट्टि घषोत्कायोत्तिष्ठोगं सत्यं
प्राजापत्य स्तस्यैवं चतुष्षष्टिः ॥ ६४ ॥

अम्भासि वृषा हगंस स्सर्वोवा आयातु श्रद्धायां तत्पुरुषाय
शब्दाशीतिः ॥ ८० ॥

हरिः ओम् श्रीकृष्णार्पणमस्तु ॥

तैत्तिरीयोपनिषदि चतुर्थः प्रश्नः ॥

द्राविडपाठस्समाप्तः ॥

|| श्रीः ||

# || तैत्तिरीयोपनिषदि ||

## || चतुर्थः प्रश्नः ||

अथ नारायणोपनिषत्

## || आन्ध्रपाठः ||

काण्डर्षिः-याज्ञिकीर्देवता उपनिषत् ।

अनुवाकाः || ८० ||

## || पूर्वशांतिपाठः ||

हरिः ओम् || सहनाववतु । सहनौभुनक्तु || सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तु माविद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः ||

हरिः ओम् || अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठेमहतो महीयान् । शुक्रेणज्योतींगं षिसमनुप्रविष्टः प्रजापतिश्चरतिगर्भे अन्तः । यस्मिंन्निदगं संचविचैति सर्वं यस्मिन्देवा अधिविश्वेनिषेदुः । तदेव भूतं तदु भव्य मा इदं तदक्षरे परमेव्योमन् । येनावृतं खंच दिवं महींच येनादित्यस्तपति तेजस भ्राजसाच । यमन्त स्समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः । यतः प्रसूता जगतः प्रसूती तोयेन

जीवान्व्यचसर्ज भूम्याम् । यदोषधीभिः पुरुषा न्पशूगंश्च विवेश भूतानि चराचराणि । अतःपरं नान्यदणीयसगंहि परात्परं यन्महतो महान्तम् । यदेक मव्यक्त मनन्तरूपं विश्वं पुराणं तमसः परस्तात् ॥ १ ॥

तदेवर्तं तदु सत्यमाहु स्तदेव ब्रह्म परमं कवीनाम् । इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्यनाभिः । तदेवाग्निस्तद्वायु स्तत्सूर्यस्तदु चन्द्रमाः । तदेव शुक्रममृतं तद्ब्रह्म तदाप स्स प्रजापतिः । सर्वे निमेषा जज्ञिरेविद्युतः पुरुषा दधि । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अर्धमासा मासा ऋतव स्संवत्सरश्च कल्पन्ताम् । स आपःप्रदुघे उभे इमे अन्तरिक्ष मथोसुवः । नैनमूर्ध्वं न तिर्यञ्चं नमध्ये परिजग्रभत् । नतस्येशे कश्चन तस्य नाम महद्यशः ॥ २ ॥

न संदृशे तिष्ठति रूप मस्य न चक्षुषा पश्यति कश्च नैनम् । हृदामनीषा मनसाभिऽक्लृप्तो य एनं विदु रमृतास्ते भवन्ति । अद्भ्य स्सम्भूतो हिरण्यगर्भ इत्यष्टौ । एष हि देवः प्रदिशोऽनुसर्वाः पूर्वोहि जात स्स उगर्भे अन्तः । सविजायमान स्सजनिष्यमाणः प्रत्यङ्मुखा स्तिष्ठति विश्वतोमुखः । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यांनमतिसंपतत्रै द्यावापृथिवी जनयन्देव एकः । वेन स्तत्पश्य न्विश्वा भुवनानि विद्वान् यत्रविश्वं भवत्येक नीळम् । यस्मिन्निदगूं सं चविचैकगंस ओतः प्रोत श्च विभु प्रजासु । प्रतद्वोचे अमृतं नुविद्वा न्गन्धर्वो नाम निहितं गुहासु ॥ ३ ॥

त्रीणि पदा निहिता गुहासु य स्तद्वेद सवितुः पितासत् । सनो बन्धु र्जनिता सविधाताधामानि वेदभुवनानिविश्वा । यत्र देवाअमृतमानशाना स्तृतीये धामा न्यभ्यैरयन्त । परिद्यावापृथिवी यन्तिसद्यः परिलोकान्परि दिशःपरिसुवः । ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभव त्प्रजासु । परीत्यलोकान्परीत्य भूतानिपरीत्य-सर्वाः प्रदिशोदिशश्च । प्रजापतिः प्रथमजा ऋतस्यात्मनाऽऽत्मान-मभि संबभूव । सदसस्पतिमद्भुतं प्रियमिन्द्रस्यकाम्यम् । सनि मेधा मयासिषम् । उद्दीप्यस्वजातवेदोऽपघ्नन्निर् ऋतिं मम ॥ ४ ॥

पशूꣳश्च मह्यमावह जीवनंचदिशोदिश । मानो हिꣳसीज्जात-वेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रियामापरिपातय । पुरुषस्य विद्महेसहस्राक्षस्य महादेवस्य धीमहि । तन्नोरुद्रः प्रचोदयात् । तत्पुरुषाय विद्महे महादेवायधीमहि । तन्नोरुद्रःप्रचोदयात् । तत्पुरुषाय विद्महे वक्रतुण्डायधीमहि ॥ ५ ॥

तन्नोनन्दिः प्रचोदयात् । तत्पुरुषायविद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचोदयात् । तत्पुरुषायविद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् । वेदात्मनाय विद्महे हिरण्य-गर्भाय धीमहि । तन्नो ब्रह्मप्रचोदयात् । नारायणाय विद्महे वासुदे-वाय धीमहि । तन्नोविष्णुःप्रचोदयात् । वज्रनखाय विद्महे तीक्ष्णदꣳ-ष्ट्रायधीमहि ॥ ६ ॥

तन्नो नारसिंग्ंह: प्रचोदयात् । भास्कराय विद्महे महद्द्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् । वैश्वानराय विद्महे लालीलाय धीमहि । तन्नो अग्निः प्रचोदयात् । कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् । सहस्रपरमा देवी शतमूला शताङ्कुरा । सर्वग्ं हरतु मे पापं दूर्वा दुस्स्वप्ननाशनी । काण्डात्काण्डात् प्ररोहन्ती परुषः परुषः परि ॥ ७ ॥

एवा नो दूर्वे प्रतनु सहस्रेण शतेन च । या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् । अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा । शिरसा धारयिष्यामि रक्षस्व मां पदेपदे । भूमि धेनुर्धरणी लोकधारिणी । उद्धृताऽसि वराहेण कृष्णेन शत बाहुना । मृत्तिके हन मे पापं य न्मया दुष्कृतं कृतम् । मृत्तिके ब्रह्मदत्ताऽसि काश्यपेनाभिमन्त्रिता । मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥ ८ ॥

मृत्तिके प्रतिष्ठिते सर्वं त न्मे निर्णुद मृत्तिके । तया हतेन पापेन गच्छामि परमां गतिम् । यत इन्द्र भयामहे ततो नो अभयं कृधि । मघव ञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि । स्वस्तिदा विशस्पति र्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः । स्वस्ति न इन्द्रो वृद्धश्रवा स्स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति न स्तार्क्ष्यो अरिष्टनेमि स्स्वस्ति नो बृहस्पति-र्दधातु । आपान्त मन्यु स्तृपलप्रभर्मा धुनि श्शिमीवा ञ्छरुमाग्ं

ऋजीषी । सामो विश्वान्यतसावनानि नार्वा गिन्द्रं प्रतिमानानि देभुः ॥ ९ ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ता द्विसीमत स्सुरुचो वेन आवः । सबुध्निया उपमा अस्य विष्ठा स्सतश्चयोनि मसंत श्चविवः । स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छानश्शर्म सप्रथाः । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीगूंसर्वभूतानां तामिहोप ह्वये श्रियम् । श्रीर्मेभजतु । अलक्ष्मीर्मेनश्यतु । विष्णु मुखा वै देवाश्छन्दोभिरिमाल्लोका ननपजय्य मभ्यं जयन् । महागूं इन्द्रो वज्र बाहुष्षोडशी शर्म यच्छतु ॥

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि । सोमानगूं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजम् । शरीरं यज्ञशमलं कुसीदं तस्मि न्सीदतु यो ऽस्मा न्द्वेष्टि । चरणं पवित्रं विततं पुराणं ; येन पूत स्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूता अति पाप्मान मरातिं तरेम । सजोषा इन्द्र सगणो मरुद्भिस्सोमं पिब वृत्रह ञ्छूर विद्वान् । जहि शत्रूगूं रप मृधो नुदस्वाथाभयं कृणुहि विश्वतोनः । सुमित्रान आप ओषधय स्सन्तु दुर्मित्रास्तस्मै भूयासु र्योस्मा न्द्वेष्टि यं च वयं द्विष्मः । आपोहिष्ठा मयोभुवस्तान ऊर्जे दधातन ॥ ११ ॥

महेरणाय चक्षसे । योव श्शिवतमो रस स्तस्य भाजयतेहनः । उशती रिव मातरः । तस्मा अरंगमामवो यस्यक्षयाय जिन्वथ ।

आपोऽजन यथा च नः । हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मेदेहि याचितः । य न्मया भुक्त मसाधूनां पापेभ्य श्च प्रतिग्रहः । य न्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् । तन्नइन्द्रो वरुणो बृहस्पति स्सविता च पुनन्तु पुनःपुनः । नमो ऽग्नये ऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमो ऽद्भ्यः ॥ १२ ॥

यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात् । अत्याशनादतीपाना द्यच्च उग्रा त्प्रतिग्रहात् । तन्नो वरुणो राजा पाणिना ह्यवमर्शतु । सोऽह मपापो विरजो निर्मुक्तो मुक्तकिल्बिषः । नाकस्य पृष्ठ मारुह्य गच्छे द्ब्रह्म सलोकताम् । यश्चाप्सु वरुणस्स पुनात्वघमर्षणः । इमं मे गङ्गे यमुने सरस्वतिशुतुद्रि सोमगं सचता परुष्णिया । असिक्रिया मरुद्वृधे वितस्तया ऽऽर्जीकीये शृणुह्या सुषोमया । ऋतं च सत्यं चाभीद्धा त्तपसो ऽध्यजायत । ततो रात्रिरजायत तत स्समुद्रोऽर्णवः ॥ १३ ॥

समुद्रादर्णवा दधि संवत्सरो अजायत । अहोरात्राणिविदध द्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौधाता यथापूर्व मकल्पयत् । दिवं च पृथिवीं चान्तरिक्ष मथो सुवः । यत्पृथिव्यागं रजस्स्व मान्तरिक्षे विरोदसी । इमागं स्तदापो वरुणः पुनात्वघमर्षणः । पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः । एष भूतस्य मध्ये भुवनस्य गोप्ता । एष पुण्यकृतां लोकानेष मृत्योर् हिरण्मयम् । द्यावापृथिव्योर् हिरण्मयगं सगं श्रितगं सुवः ॥ १४ ॥

सन स्सुव स्सगूं शिशाधि । आर्द्रं ज्वलति ज्योति रहमस्मि । ज्योतिर्ज्वलति ब्रह्माह मस्मि । योऽह मस्मि ब्रह्माऽहमास्मि । अहमस्मि ब्रह्माह मस्मि । अहमेवाहं मांजुहोमि स्वाहा । अकार्यकार्यवकीर्णी-स्तेनो भ्रूणहागुरुतल्पगः । वरुणोऽपामघमर्षण स्तस्मा त्पापात्प्रमुच्यते । रजोभूमि स्त्वमागूंरोदयस्व प्रवदन्ति धीराः । आक्रान्थ्स मुद्रः प्रथमे विधर्मञ्जनय न्प्रजा भुवनस्य राजा । वृषा पवित्रे अधिसानो अव्येबृहथ्सोमो वावृधे सुवान इन्दुः ॥ १५ ॥

परस्ताद्यशो गुहासु । मम चक्रतुण्डायधीमहि तीक्ष्णदगूंष्ट्राय धीमहि परि प्रतिष्ठितं देभुर्यच्छतु दधातनाद्भ्योऽर्णव स्सुवो राजैकं च ॥ १ ॥

रुद्रोरुद्रश्चदन्तिश्चनन्दिष्षण्मुख एवच । गरुडो ब्रह्मविष्णुश्च नारसिगं् हस्तथैवच ॥ आदित्योऽग्निश्च दुर्गिश्चक्रमेणद्वादशाम्भसि । ममवचमसुवेनावभावैकात्यार्थनाय ॥ १ ॥

---

## ॥ द्वितीयोऽनुवाकः ॥

॥ अनिष्टपरिहारार्थं जप्या मन्त्राः ॥

जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः । स नः पर्षदतिदुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः । ता मग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीगं् शरण महं प्रपद्ये सुतरसि तरसे नमः । अग्नेत्वं पारया नव्यो अस्मा न्थ्स्वास्तिभि-

रति दुर्गाणि विश्वा । पृथश्च पृथ्वी बहुला न उर्वीभवा तोकाय तनयाय शंयोः ॥ विश्वानि नो दुर्गहा जातवेद स्सिन्धुं न नावा दुरिताऽतिपर्षि । अग्ने अत्रिवन्मनसा गृणानो ऽस्माकं बोध्यविता तनूनाम् । पृतना जितगूं सहमान मुग्रमाग्निगूं हुवेम परमा थ्सधस्थात् । स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरितात्यऽग्निः । प्रत्नोषिक मीड्यो अध्वरेषु सनाचहोता नव्यश्चसत्सि । स्वांचाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभग मायजस्व । गोभिर्जुष्ट मयुजो निषिक्तं तवेन्द्रविष्णो रनुसंचरेम । नाकस्यपृष्ठ मभिसंवसानो वैष्णवीं लोक इह मादयन्ताम् ॥ १६ ॥ २ ॥

---

## ॥ तृतीयोऽनुवाकः ॥

॥ अन्नसमृद्धिकामस्य होममन्त्राः ॥

भू रन्न मग्नये पृथिव्यै स्वाहाभुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहासुवरन्न मादित्याय दिवे स्वाहा भू र्भुवस्सुव रन्नं चन्द्रमसे दिग्भ्य स्स्वाहा नमो देवेभ्य स्स्वधापितृभ्यो भू र्भुव स्सुव रन्नमोम् ॥ १७ ॥ ३ ॥

---

## ॥ चतुर्थोऽनुवाकः ॥

॥ पापक्षयार्था महाव्याहृतिहोम मन्त्राः ॥

भू रग्नये पृथिव्यै स्वाहा भुवो वायवेऽन्तरिक्षायस्वाहा सुवरादित्याय दिवे स्वाहा भू र्भुवस्सुव श्चन्द्रमसे दिग्भ्य स्स्वाहा नमो देवेभ्य स्स्वधा पितृभ्यो भू र्भुवस्सुव रग्न ओम् ॥ १८ ॥ ४ ॥

## ॥ पञ्चमोऽनुवाकः ॥

॥ महत्त्वकामस्य तत्फलका होममन्त्राः ॥

भू रग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चान्तरिक्षाय च महते च स्वाहा सुवरादित्याय च दिवे च महते च स्वाहा भू र्भुवस्सुव श्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्य श्च महते च स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भू र्भुव स्सुव र्महरोम् ॥ १९ ॥ ५ ॥

---

## ॥ षष्ठोऽनुवाकः ॥

॥ ज्ञानप्राप्त्यर्था होममन्त्राः ॥

पाहि नो अग्न एनसे स्वाहा । पाहि नो विश्ववेदसे स्वाहा । यज्ञं पाहि विभावसो स्वाहा । सर्वं पाहि शतक्रतो स्वाहा ॥ २० ॥ ६ ॥

---

## ॥ सप्तमोऽनुवाकः ॥

॥ ज्ञानप्राप्त्यर्था मन्त्राः ॥

पाहि नो अग्न एकया । पाह्युत द्वितीयया । पाह्यूर्ज तृतीयया । पाहि गीर्भि श्चतसृभि र्वसो स्वाहा ॥ २१ ॥ ७ ॥

---

## ॥ अष्टमोऽनुवाकः ॥

॥ वेदान्तप्राप्तिकामेन जप्यः मन्त्रः ॥

यश्छन्दसा मृषभो विश्वरूप श्छन्दोभ्य श्छन्दाग्ं स्याविवेश। सचाग्ं शिक्यः पुरो वाचोपनिष दिन्द्रो ज्येष्ठ इन्द्रियाय ऋषिभ्यो नमो देवेभ्यस्स्वधा पितृभ्यो भूर्भुव स्सुव श्छन्द ओम् ॥ २१ ॥ ८ ॥

---

## ॥ नवमोऽनुवाकः ॥

॥ लब्धवेदाविस्मरणाय जप्यः मन्त्रः ॥

नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिताभूयासं कर्णयो श्श्रुतं माच्योद्वममामुष्य ओम् ॥ २३ ॥ ९ ॥

---

## ॥ दशमोऽनुवाकः ॥

॥ तपः प्रशंसा ॥

ऋतं तपः स्सत्यं तप श्श्रुतं तपश्शान्तं तपो दम स्तपश्शमस्तपो दानं तपो यज्ञं तपो भूर्भुवस्सुव र्ब्रह्मैतदुपास्यैतत्तपः ॥ २४ ॥ १०॥

---

## ॥ एकादशोऽनुवाकः ॥

॥ विहिताचरणप्रशंसा निषिद्धाचरणनिन्दा च ॥

यथा वृक्षस्य संपुष्पितस्य दूरा द्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति यथा ऽसिधारां कर्तेऽवहितामवक्रामे यद्युवे युवे हवा विह्वयिष्यामि कर्तं पतिष्यामीत्येव ममृता दात्मानं जुगुप्सेत् ॥ २५ ॥ ११ ॥

---

## ॥ द्वादशोऽनुवाकः ॥

### ॥ तत्त्वोपदेशः ॥

अणो रणीयान्महतो महीया नात्मा गुहायां निहितो ऽस्य जन्तोः । त मक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमान-मीशम् । सप्तप्राणाः प्रभवन्ति तस्मा थ्सप्तार्चिषस्समिधं स्सप्तजिह्वाः । सप्त इमे लोका येषु चरन्ति प्राणागुहाशया न्निहिता स्सप्तसप्त । अतस्समुद्रा गिरयश्च सर्वेऽस्माथ्स्यन्दन्ते सिन्धव स्सर्वरूपाः । अतश्च विश्वा ओषधयो रसाच्च येनैष भूत स्तिष्ठत्यन्तरात्मा । ब्रह्मा देवानां पदवीः कवीना मृषि र्विप्राणां महिषो मृगाणाम् । श्येनो गृद्ध्राणागूं स्वधिति र्वना नागूं सोमःपवित्रमत्येतिरेभन्न् । अजा मेकां लोहितशुक्ल कृष्णां बह्वीं प्रजां जनयन्तीगूं सरूपाम् । अजो ह्येकोजुष-माणोऽऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ २६ ॥

हगूंस श्शुचिष द्वसु रन्तरिक्षस द्धोता वेदिषदतिथिर्दुरोणसत् । नृष द्वरस दृतस द्व्योमस दब्जा गोजा ऋतजा अद्रिजाऋतं बृहत् । घृतं मिमिक्षिरे घृतमस्य योनि र्घृतेश्रितो घृत मुवस्य धाम । अनुष्वध-मावह मादयस्वस्वाहाकृतं वृषभ वक्षि हव्यम् । समुद्रादूर्मिमधुमागूं उदार दुपागूंशुना सममृतत्व मानट् । घृतस्य नामगुह्यं यदस्ति जिह्वा देवाना ममृतस्य नाभिः । वयं नामप्रब्रवामघृते नास्मिन् यज्ञे धार यामा नमोभिः । उप ब्रह्माशृणव च्छस्यमानं चतुश्शृङ्गो ऽवमी द्गौर एतत् । चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधाबद्धो वृषभो रोरवीति महो देवो मर्त्यागूं आविवेश ॥ २७ ॥

त्रिधाहितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् । इन्द्र एकगूं सूर्य एकं जजान वेना देकगूं स्वधया निष्टतक्षुः । यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानगूं सनो देव श्शुभयास्मृत्या संयुनक्तु । यस्मा त्परं नापर-मस्ति किंचि द्यस्मान्नाणीयो नज्यायों ऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठ त्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् । न कर्मणा नप्रजया धनेनत्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राज-देतद्यतयो विशन्ति । वेदान्त विज्ञान सुनिश्चितार्थास्संन्यास योगाद्यतय-श्शुद्धसत्त्वाः । तेब्रह्मलोकेतु परान्तकाले परामृतात्परिमुच्यन्तिसर्वे । दह्रं विपापं परमें ऽश्मभूतं यत्पुण्डरीकं पुरमध्यसगूंस्थम । तत्रापि दह्रं गगनं विशोकं स्तस्मिन् यदन्तस्त दुपासितव्यम् । यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृति लीनस्य यः पर-स्समहेश्वरः ॥ २८ ॥

अजो ऽन्य आविवश सर्वे चत्वारिच ॥ १२ ॥

---

## ॥ त्रयोदशोऽनुवाकः ॥

### ॥ उपास्यगुणविशेषप्रदर्शनम् ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देव-मक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वंनारायणगूं हरिम् । विश्वमेवेदं पुरुष स्तद्विश्व मुपजीवति । पतिं विश्वस्यात्मेश्वरगूं शाश्व-तगूं शिव मच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारा-

यणपरोज्योतिरात्मानारायणꣳ परः । नारायणपरं ब्रह्म तत्त्वंनारायणꣳ परः । नारायण परो ध्याता ध्यानं नारायणꣳ परः । यच्च किंचिज्जगथ्सर्वं दृश्यतें श्रूयतेऽपिवा ॥ २९ ॥

अन्तर्बहिश्च त त्सर्वं व्याप्य नारायण स्थितः । अनन्तमव्ययं कविगं समुद्रेऽन्तं विश्वशंम्भुवम् । पद्मकोश प्रतीकाशगुं हृदयं चाप्यधोमुखम् । अधोनिष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति । ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । सन्ततगं शिलाभि स्तुलम्बत्याकोश सन्निभम् । तस्यान्ते सुषिरगुंसूक्ष्मं तस्मिं थ्सर्वं प्रतिष्ठितम् । तस्य मध्ये महानग्नि विश्वार्चि विश्वतो मुखः । सोऽग्रभुग्विभज न्तिष्ठ न्नाहारमजरꣳ कविः । तिर्य गूर्ध्व मधश्शायी रश्मयस्तस्य सन्तता । सन्तापयति स्वंदेहमापादतलमस्तगः । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतो यदमध्यस्था द्विद्युलेखेव भास्वरा । नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याशिशखाया मध्ये परमात्माव्यवस्थितः । सब्रह्म स शिव स्स हरि स्सेन्द्रस्सोऽक्षरꣳ परम स्स्वराट् ॥ ३० ॥

अपि वां सन्तता षट्च ॥ १३ ॥

---

## ॥ चतुर्दशोऽनुवाकः ॥

### ॥ आदित्यमण्डले परब्रह्मोपासनम् ॥

आदित्यो वा एष एतन्मण्डलं तपति तत्रता ऋचस्त हचा मण्डलगुं स ऋचां लोकोऽथ य एष एतस्मिन्मण्डले ऽर्चिर्दीप्यते तानि-

सामानि स साम्नां लोकोऽथय एष एतस्मिन्मण्डलेऽर्चिष पुरुष स्तानि यजूꣳषि स यजुषा मण्डलगं स यजुषां लोक स्सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः ॥ ३१ ॥ १४ ॥

---

## ॥ पञ्चदशोऽनुवाकः ॥

॥ आदित्यपुरुषस्यैव सर्वात्मकत्वोपास्यगुणवत्वप्रदर्शनम् ॥

आदित्यो वै तेज ओजो बलं यश श्चक्षु श्श्रोत्रमात्मामनो मन्युर्मनुर्मृत्युस्सत्यो मित्रो वायु राकाशः प्राणो लोकपालः कः किं कं तथ्सत्यमन्न ममृतो जीवो विश्वः कतम स्स्वयम्भु ब्रह्मैत दमृत एष पुरुष एष भूताना मधिपति ब्रह्मण स्सायुज्यगं सलोकता माप्नोत्येतासा मेव देवतानागं सायुज्यगं सार्ष्टितागं समानलोकता माप्नोति य एवंवेदे" त्युपनिषत् ॥ ३२ ॥ १५ ॥

---

## ॥ षोडशोऽनुवाकः ॥

॥ नमस्कारार्थ मन्त्राः ॥

निधनपतये नमः । निधनपतान्तिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः । हिरण्याय नमः । हिरण्यलिङ्गाय नमः । सुवर्णाय नमः । सुवर्णलिङ्गाय नमः । दिव्याय नमः । दिव्यलिङ्गाय नमः । भवाय नमः ॥ ३३ ॥

भवलिङ्गाय नमः । शर्वाय नमः । शर्वलिङ्गाय नमः । शिवाय नमः । शिवलिङ्गाय नमः । ज्वलाय नमः । ज्वललिङ्गाय नमः ।

आत्माय नमः । आत्मलिङ्गाय नमः । परमायनमः । परमलिङ्गाय नमः । एतथ्सोमस्य सूर्यस्य सर्वलिङ्गग्ं स्थापयति पाणिमन्त्रं पवित्रम् ॥ ३४ ॥ १६ ॥

## ॥ सप्तदशोऽनुवाकः ॥

### ॥ पश्चिमवक्त्रप्रतिपादकमन्त्रः ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवेभवे-नातिभवेभवेभवस्वमाम् । भवोद्भवाय नमः । ३५ ॥ १७ ॥

---

## ॥ अष्टादशोऽनुवाकः ॥

### ॥ उत्तरवक्त्रप्रतिपादकमन्त्रः ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमोरुद्राय नमः काला‌य नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथ-नाय नमस्सर्व भूतदमनाय नमो मनोन्मनाय नमः ॥ ३६ ॥ १८ ॥

---

## ॥ एकोनविंशोऽनुवाकः ॥

### ॥ दक्षिणवक्त्रप्रतिपादकमन्त्रः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्य स्सर्व-शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ ३७ ॥ १९ ॥

---

## ॥ विंशोऽनुवाकः ॥

### ॥ प्राग्वक्त्रप्रतिपादकमन्त्रः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नोरुद्रः प्रचोदयात् ॥ ३८ ॥ २० ॥

## ॥ एकविंशोऽनुवाकः ॥

॥ ऊर्ध्ववक्त्रप्रतिपादकमन्त्रः ॥

ईशान स्सर्वविद्याना मीश्वर स्सर्वभूतानां ब्रह्माऽधिपति र्ब्रह्मणोऽधिपति ब्रह्मा शिवोमे अस्तु सदाशिवोम् ॥ ३९ ॥ २१ ॥

---

## ॥ द्वाविंशोऽनुवाकः ॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमोनमः ॥ ४० ॥ २२ ॥

---

## ॥ त्रयोविंशोऽनुवाकः ॥

॥ उपास्य पुरुषस्य नमस्कारार्थमन्त्रः ॥

ऋतगं सत्यं परं ब्रह्मपुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमोनमः ॥ ४१ ॥ २३ ॥

---

## ॥ चतुर्विंशोऽनुवाकः ॥

॥ रुद्रदेवताकमन्त्रः ॥

सर्वो वै रुद्र स्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रस्सन्महो नमोनमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यम् । सर्वो ह्येष रुद्र स्तस्मै रुद्राय नमो अस्तु ॥ ४२ ॥ २४ ॥

---

## ॥ पंचविंशोऽनुवाकः ॥

॥ रुद्रदेवताक मन्त्रः ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमगं हृदे । सर्वोह्येष रुद्र स्तस्मै रुद्राय नमो अस्तु ॥ ४३ ॥ २५ ॥

---

## ॥ षड्विंशोऽनुवाकः ॥

॥ अग्निहोत्रहवण्याः उपयुक्तस्य वृक्षविशेषस्याभिधानम् ॥

यस्य वै कंकत्यग्निहोत्रहवणी भवतिप्रत्येवा स्याहुतय स्तिष्ठन्त्यथो प्रतिष्ठित्यै ॥ ४४ ॥ २६ ॥

---

## ॥ सप्तविंशोऽनुवाकः ॥

॥ रक्षोघ्नमन्त्रनिरूपणम् ॥

कृणुष्वपाज इति पञ्च ॥ ४५ ॥ २७ ॥

---

## ॥ अष्टाविंशोऽनुवाकः ॥

॥ भूदेवताकमन्त्रः ॥

अदिति र्देवा गन्धर्वा मनुष्याः पितरोऽसुरा स्तेषागं सर्वभूतानां माता मेदिनी महता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमाका या सा सत्येत्यमृतेति वसिष्ठः ॥ ४६ ॥ २८ ॥

## ॥ एकोनत्रिंशोऽनुवाकः ॥

॥ जलदेवताक मन्त्रः ॥

आपो वा इदगूं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्न मापोऽमृत मापः स्सम्राडापो विराडापस्स्वराडाप श्छन्दागूं स्यापो ज्योतीगूं ष्यापो यजूगूंष्यापस्सत्यमाप स्सर्वा देवता आपो भूर्भुव स्सुव राप ओम् ॥ ४७ ॥ २९ ॥

---

## ॥ त्रिंशोऽनुवाकः ॥

॥ मध्याह्नसन्ध्यांगाभिमन्त्रितजलपान मन्त्रः ॥

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पति र्ब्रह्मपूता पुनातु माम् । यदुच्छिष्ट मभोज्यं य द्वा दुश्चरितं मम । सर्वं पुनन्तु मा मापोऽसतां च प्रतिग्रहगूं स्वाहा ॥४८॥३०॥

---

## ॥ एकत्रिंशोऽनुवाकः ॥

॥ सायंसन्ध्याकालजलपानमन्त्रः ॥

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यदह्ना पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । अहस्त दवलुम्पतु । यत्किञ्च दुरितं मयि । इदमहं माममृतयोनौ । सत्ये ज्योतिषि जुहोमि स्वाहा ॥ ४९ ॥ ३१ ॥

---

## ॥ द्वात्रिंशोऽनुवाकः ॥

॥ प्रातः सन्ध्याकालजलपान मन्त्रः ॥

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यद्रात्रिया पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । रात्रि स्तदवलुम्पतु । यत्किञ्च दुरितं मयि । इदमहं मा ममृतयोनौ । सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ५० ॥ ३२ ॥

---

## ॥ त्रयस्त्रिंशोऽनुवाकः ॥

॥ प्रणवस्य ऋष्यादि विवरणम् ॥

ओमित्येकाक्षरं ब्रह्म । अग्निर्देवता ब्रह्म इत्यार्षम् । गायत्रं छन्दं परमात्मं सरूपम् । सायुज्यं विनियोगम् ॥ ५१ ॥ ३३ ॥

---

## ॥ चतुस्त्रिंशोऽनुवाकः ॥

॥ गायत्र्यावाहन मन्त्रः ॥

आयातु वरदा देवी अक्षरं ब्रह्मसंमितम् । गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व नः । यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते । यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते । सर्ववर्णे महादेवि सन्ध्याविद्ये सरस्वति ॥ ५२ ॥ ३४ ॥

---

## ॥ पंचत्रिंशोऽनुवाकः ॥

॥ गायत्र्यावाहन मन्त्रः ॥

ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामासि विश्वमसि विश्वायु स्सर्वमसि सर्वायु रभिभूरों गायत्री मावाहयामि सावित्री मावाहयामि सरस्वती मावाहयामि छन्दर्षी नावाहयामि श्रिय मावाहयामि गायत्रिया गायत्रीच्छन्दो विश्वामित्रऋषिस्सविता देवताऽग्निर्मुखं ब्रह्मा शिरो विष्णुर् हृदयग्ं रुद्र श्शिखा पृथिवीयोनिः प्राणापानव्यानोदानस्समाना सप्राणा श्वेतवर्णा साङ्ख्यायनसगोत्रा गायत्री चतुर्विंग्ंशत्यक्षरात्रिपदा षट्कुक्षिः पञ्च शीर्षोपनयने विनियोगः । ओंभूः । ओंभुवः । ओग्ं सुवः । ओं महः । ओंजनः । ओंतपः । ओग्ं सत्यम् । ओं तथ्सवितु र्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओ मापो ज्योती रसोऽमृतं ब्रह्म भू र्भुवस्सुव रोम् ॥ ५२ ॥ ३५ ॥

---

## ॥ षट्त्रिंशोऽनुवाकः ॥

॥ जपादूर्ध्वं गायत्री विसर्जन मन्त्रः ॥

उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छदेवि यथासुखम् । स्तुतो मया वरदा वेदमाता प्रचोदयन्ती पवने द्विजाता । आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रजातुं ब्रह्मलोकम् ॥ ५४ ॥ ३६ ॥

---

## ॥ सप्तत्रिंशोऽनुवाकः ॥

॥ आदित्यदेवतामन्त्रः ॥

घृणि स्सूर्य आदित्यो न प्रभावात्यक्षरम् । मधुक्षरन्ति तद्रसम् । सत्यं वै तद्रस मापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुव स्सुवरोम् ॥ ५५ ॥ ३७ ॥

---

## ॥ अष्टत्रिंशोऽनुवाकः ॥

॥ त्रिसुपर्णमन्त्रः ॥

ब्रह्म मेतु माम् । मधु मेतु माम् । ब्रह्म मेव मधु मेतु माम् । यास्ते सोम प्रजावथ्सोऽभिसो अहम् । दुष्वप्नहंदुरुष्षहा । यास्ते सोम प्राणागूं स्ताञ्जुहोमि । त्रिसुपर्ण मयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वाएते घ्नन्ति । ये ब्राह्मणा स्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ओम् ॥ ५६ ॥ ३८ ॥

---

## ॥ एकोनचत्वारिंशोऽनुवाकः ॥

॥ त्रिसुपर्णमन्त्राः तन्महिमा च ॥

ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधु मेधया । अद्या नो देव सवितः प्रजावथ्सावी स्सौभगम् । परा दुष्वप्नियगंसुव विश्वानि देव सवित र्दुरितानि परा सुव । यद्भद्रं तन्म आसुव । मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्न स्सन्त्वोषधीः । मधुनक्तमुतोषसि मधुम त्पार्थिवगं रजः । मधुद्यौरस्तु नःपिता । मधुमान्नो

वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । य इमं त्रिसुपर्ण मयाचितं ब्राह्मणाय दद्यात् । भ्रूणहत्यां वा एते घ्नन्ति । ये ब्राह्मणा स्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ओम् ॥ ॥ ५७ ॥ ३९ ॥

---

## ॥ चत्वारिंशोऽनुवाकः ॥

### ॥ त्रिसुपर्णमन्त्राः ॥

ब्रह्म मेधवा । मधु मेधवा । ब्रह्म मेव मधु मेधवा । ब्रह्मा देवानां पदवीः कवीना मृषि र्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणाꣳ स्वधिति र्वनानाꣳ सोमः पवित्रमत्येति रेभन्न् । हꣳस-श्शुचिष द्वसु रन्तरिक्षस द्धोता वेदिष दतिथिर्दुरोणसत् । नृष द्वरस-दृतस द्व्योमस दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । ऋचे त्वा रुचे त्वा समित्स्रवन्ति सरितो न धेनाः । अन्तर् हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमि । हिरण्ययो वेतसो मध्य आसाम् । तस्मिन्त्सुपर्णो मधुकृ त्कुलायी भज न्नास्ते मधु देवताभ्यः । तस्या सते हरय स्सप्ततीरे" । स्वधां दुहाना अमृतस्य धाराम् । य इमं त्रिसुपर्ण मयाचितं ब्राह्मणाय दद्यात् । वीरहत्यां वा एते घ्नन्ति । ये ब्राह्मणा स्त्रिसुपर्णं पठन्ति ते सोमं प्राप्नुवन्ति । आसहस्रा त्पङ्क्तिं पुनन्ति । ओम् ॥ ५८ ॥ ४० ॥

---

## ॥ एकचत्वारिंशोऽनुवाकः ॥

॥ मेधाभिमानिदेवताप्रार्थनमन्त्रौ ॥

मेधादेवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना । त्वया जुष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः । त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मा गतश्रीरुत त्वया । त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ॥ ५९ ॥ ४१ ॥

---

## ॥ द्विचत्वारिंशोऽनुवाकः ॥

॥ इंद्रादिदेवताप्रार्थनमन्त्रः ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा । अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः । दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषताग्ंस्वाहा ॥ ६० ॥ ४२ ॥

---

## ॥ त्रिचत्वारिंशोऽनुवाकः ॥

॥ मेधाप्रदमन्त्रः ॥ 2 m

आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥ ६१ ॥ ४३ ॥

## ॥ चतुश्चत्वारिंशोऽनुवाकः ॥

॥ मेधाजननार्थं अग्नीन्द्रसूर्यप्रार्थनामन्त्रः ॥

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ ६२ ॥ ४४ ॥

---

## ॥ पंचचत्वारिंशोऽनुवाकः ॥

॥ अभीष्टयाचनामन्त्रः ॥

अपैतु मृत्यु रमृतं न आगन्वैवस्वतो नो अभयं कृणोतु । पर्णं वनस्पते रिवाभिनः शीयतागं रयि स्सचतां न शाचीपतिः ॥ ६३ ॥ ४५ ॥

---

## ॥ षट्चत्वारिंशोऽनुवाकः ॥

॥ मृत्युदेवताप्रार्थनामन्त्रः ॥

परं मृत्यो अनुपरेहि पन्थां य स्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजागं रीरिषो मोत वीरान् ॥ ६४ ॥ ४६ ॥

---

## ॥ सप्तचत्वारिंशोऽनुवाकः ॥

॥ प्रजापतिप्रार्थनामन्त्रः ॥

वातं प्राणं मनसाऽन्वारभामहे प्रजापतिं यो भुवनस्य गोपाः । स नो मृत्यो स्त्रायतां पात्वगं हसो ज्योग्जीवा जरा मशीमहि ॥ ॥ ६५ ॥ ४७ ॥

---

## ॥ अष्टचत्वारिंशोऽनुवाकः ॥

॥ बृहस्पतिस्तुतिमन्त्रः ॥

अमुत्र भूया दध य द्यमस्य बृहस्पते अभिशस्ते रमुञ्चः । प्रत्यौहता मश्विना मृत्यु मस्मा द्देवाना मग्ने भिषजा शचीभिः ॥ ६६ ॥ ४८ ॥

## ॥ एकोनपंचाशोऽनुवाकः ॥

॥ परमात्मस्तुतिमन्त्रः ॥

हरिंगूं हरन्त मनुयन्ति देवा विश्वस्येशानं वृषभं मतीनाम् । ब्रह्म स्वरूप मनुमेद मागा दयनं माविवधी विक्रमस्व ॥६७॥४९॥

## ॥ पंचाशोऽनुवाकः ॥

॥ परमात्मस्तुतिमन्त्रः ॥

शल्कैरग्नि मिन्धान उभौ लोकौ सनेमहम् । उभयोर्लोकयोर् ऋध्वाऽतिमृत्युं तराम्यहम् ॥ ६८ ५० ॥

## ॥ एकपंचाशोऽनुवाकः ॥

॥ मृत्युदेवताप्रार्थनामन्त्रः ॥

मा छिदो मृत्यो मावधी मा मे बलं विवृहो मा प्रमोषीः । प्रजां मा मे रीरिष आयु रुग्र नृचक्षसं त्वा हविषा विधेम ॥६९॥५१॥

## ॥ द्विपञ्चाशोऽनुवाकः ॥

॥ रुद्रदेवताप्रार्थनामन्त्रः ॥

मानो महान्तमुत मा नो अर्भकं मान उक्षन्तमुतमान उक्षितम् । मानोवधीः पितरं मोत मातरं प्रिया मानस्तनुवो रुद्र रीरिषः । ॥ ७० ॥ ५२ ॥

---

## ॥ त्रिपंचाशोऽनुवाकः ॥

॥ महारुद्रप्रार्थनामन्त्रः ॥

मान स्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः । वीरा न्मानो रुद्रभामितो वधीर् हविष्मन्तो नमसा विधेम ते ॥ ७१ ॥ ५३ ॥

## ॥ चतुष्पंचाशोऽनुवाकः ॥

॥ प्रजापतिप्रार्थनामन्त्रः ॥

प्रजापते नत्वदेतान्यन्यो विश्वा जातानि परिता बभूव । यत्कामा स्ते जुहुमस्तन्नो अस्तु वयग्गं स्याम पतयो रयीणाम् ॥ ७२ ॥ ५४ ॥

## ॥ पंचपंचाशोऽनुवाकः ॥

॥ इंद्रप्रार्थनामन्त्रः ॥

स्वस्तिदा विशस्पति र्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नस्स्वस्तिदा अभयंकरः ॥ ७३ ॥ ५५ ॥

---

## ॥ षट्पंचाशोऽनुवाकः ॥

॥ त्र्यंबकस्तुतिमन्त्रः ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धना न्मृत्योर्मुक्षीयमामृतात् ॥ ७४ ॥ ५६ ॥

---

## ॥ सप्तपंचाशोऽनुवाकः ॥

॥ मृत्युप्रार्थनामन्त्रः ॥

येते सहस्र मयुतं पाशा मृत्यो मर्त्याय हन्तवे । तान् यज्ञस्य मायया सर्वा नवयजामहे ॥ ७५ ॥ ५७ ॥

---

## ॥ अष्टपंचाशोऽनुवाकः ॥

॥ मृत्युदेवता (पापनिवारक) मन्त्रः ॥

मृत्यवे स्वाहा मृत्यवे स्वाहा ॥ ७६ ॥ ५८ ॥

---

## ॥ एकोनषष्टितमोऽनुवाकः ॥

॥ पापनिवारका मन्त्राः ॥

देवकृतस्यैनसो ऽवयजन मसि स्वाहा । मनुष्य कृतस्यैनसो ऽवयजन मसि स्वाहा । पितृकृतस्यैनसो ऽवयजनमसि स्वाहा । आत्मकृतस्यैनसोऽवयजन मसि स्वाहा । अन्यकृतस्यैनसोऽवयजन-मसि स्वाहा । अस्मत्कृतस्यैनसो ऽवयजन मसि स्वाहा । य द्दिवा च नक्तं चैनश्चकृमतस्यावयजन मसि स्वाहा । यथ्स्वपन्तश्च जाग्रत-श्चैनश्च कृम तस्यावयजन मसि स्वाहा । यथ्सुषुप्तश्च जाग्रत श्चैनश्च कृम तस्यावयजन मसि स्वाहा । यद्विद्वाꣳस श्चविद्वाꣳ स श्चैनश्च

कृमतस्यावयजनमसि स्वाहा । एनस एनसो ऽवयजन मसि स्वाहा ॥ ७७ ॥ ५९ ॥

---

## ॥ षष्टितमोऽनुवाकः ॥

### ॥ वसुप्रार्थनामन्त्रः ॥

यद्वो देवाश्च कृम जिह्वया गुरुमनसो वा प्रयुती देव हेडनम् । अरावा यो नो अभिदुच्छुनायते तस्मिन्तदेनो वसवो निधेतन स्वाहा ॥ ७८ ॥ ६० ॥

---

## ॥ एकषष्टितमोऽनुवाकः ॥

### ॥ देवतानमस्कारमन्त्रः ॥

कामोऽकार्षीन्नमोनमः । कामोकार्षीत्कामꣳ करोति नाहं करोमि कामꣳ कर्ता नाहं कर्ता कामः कारयिता नाहं कारयिता एष ते कामकामाय स्वाहा ॥ ७९ ॥ ६१ ॥

---

## ॥ द्विषष्टितमोऽनुवाकः ॥

### ॥ देवतानमस्कारमन्त्रः ॥

मन्यु रकार्षीन्नमोनमः । मन्यु रकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युः कारयिता नाहं कारयिता एषते मन्यो मन्यवे स्वाहा ॥ ८० ॥ ६२ ॥

---

## ॥ त्रिषष्टितमोऽनुवाकः ॥

॥ विरजाहोममन्त्राः ॥

तिलाञ्जुहोमि सरसागं सपिष्टा न्गान्धार मम चित्तेरमन्तु स्वाहा । गावो हिरण्यं धन मन्नपानगं सर्वेषागं श्रियै स्वाहा । श्रियं च लक्ष्मीं च पुष्टिं च कीर्तिं चानृण्यताम् । ब्रह्मण्यं बहुपुत्रताम् । श्रद्धामेधे प्रजा स्सन्ददातु स्वाहा ॥ ८१ ॥ ६३ ॥

---

## ॥ चतुष्षष्टितमोऽनुवाकः ॥

॥ विरजाहोममन्त्राः ॥

तिलाः कृष्णा स्तिला श्श्वेता स्तिला स्सौम्या वंशानुगाः । तिलाः पुनन्तु मे पापं यत्किञ्चिद्दुरितं मयि स्वाहा । चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः । गोस्तेयगं सुरापानं भ्रूणहत्या तिला शान्तिगं शमयन्तु स्वाहा । श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चानृण्यताम् । ब्रह्मण्यं बहुपुत्रताम् । श्रद्धा मेधे प्रज्ञातु जातवेद स्सं ददातु स्वाहा ॥ ८२ ॥ ६४ ॥

## ॥ पंचषाष्टितमोऽनुवाकः ॥

॥ विरजाहोममन्त्राः ॥

प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योति रहं विरजा विपाप्मा भूयासगं स्वाहा । वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणरेतो बुद्ध्याकूति स्संकल्पा मे शुध्यन्तां ज्योति रहं विरजा विपाप्मा भूयासगं स्वाहा । त्वक्चर्ममागंसरुधिरमेदो मज्जास्नायवो ऽस्थीनि मे शुध्यन्तां

ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घाशिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । उत्तिष्ठ पुरुष हरितपिङ्गल लोहिताक्षि देहि देहि ददापयिता मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ ८३ ॥ ६५ ॥

## ॥ षट्षष्टितमोऽनुवाकः ॥

### ॥ विरजाहोममन्त्राः ॥

पृथिव्यापस्तेजो वायुराकाशा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । आत्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । अन्तरात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । परमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा । क्षुधे स्वाहा । क्षुत्पिपासाय स्वाहा । विविट्यै स्वाहा । ऋग्विधानाय स्वाहा । कषोत्काय स्वाहा । क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे पाप्मानगं स्वाहा । अन्नमयप्राणमयमनोमयविज्ञानमयमानन्दमयमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ ८४ ॥ ६६ ॥

## ॥ सप्तषष्टितमोऽनुवाकः ॥

### ॥ वैश्वदेवमन्त्राः ॥

अग्नये स्वाहा । विश्वेभ्यो देवेभ्य स्स्वाहा । ध्रुवाय भूमाय स्वाहा । ध्रुवक्षितये स्वाहा । अच्युतक्षितये स्वाहा । अग्नये स्विष्टकृते स्वाहा । धर्माय स्वाहा । अधर्माय स्वाहा । अद्भ्य स्स्वाहा । ओषधिवन स्पतिभ्य स्स्वाहा ॥ ८५ ॥

रक्षोदेवजनेभ्य स्स्वाहा । गृहाभ्य स्स्वाहा । अवसानेभ्य-स्स्वाहा । अवसानपतिभ्य स्स्वाहा । सर्व भूतेभ्य स्स्वाहा । कामाय स्वाहा । अन्तरिक्षाय स्वाहा । यदेजतिजगति यच्च चेष्टति नाम्नो भागोऽयं नाम्ने स्वाहा । पृथिव्यैस्वाहा । अन्तरिक्षाय स्वाहा ॥ ८६ ॥

दिवे स्वाहा । सूर्याय स्वाहा । चन्द्रमसे स्वाहा । नक्षत्रेभ्य-स्स्वाहा । इन्द्राय स्वाहा । बृहस्पतये स्वाहा । प्रजापतये स्वाहा । ब्रह्मणे स्वाहा । स्वधा पितृभ्य स्स्वाहा । नमो रुद्राय पशुपतये स्वाहा ॥ ८७ ॥

देवेभ्य स्स्वाहा । पितृभ्य स्स्वधाऽस्तु । भूतेभ्योनमः । मनुष्ये-भ्यो हन्ता । प्रजापतयेस्वाहा । परमेष्ठिने स्वाहा । यथा कूप श्शत-धार स्सहस्रधारो अक्षितः । एवा मे अस्तु धान्यगं सहस्रधारमक्षि-तम् । धनधान्यै स्वाहा । ये भूताः प्रचरन्ति दिवानक्तं बलि मिच्छ-न्तो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपति र्दधातु स्वाहा ॥ ८८ ॥

ओषधिवनस्पतिभ्य स्स्वाहाऽन्तरिक्षाय स्वाहा नमो रुद्राय पशुपतये स्वाहा वितुदस्य प्रेष्या एकं च ॥ ६७ ॥

॥ अष्टषष्टितमोऽनुवाकः ॥

ओं तद्ब्रह्म । ओं त द्वायुः । ओं त दात्मा । ओं त थ्सत्यम् । ओं तथ्सर्वम् । ओं तत्पुरो नमः । अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्र स्त्वगं रुद्र स्त्वं विष्णु स्त्वं ब्रह्मत्वं प्रजापतिः । त्वं तदाप आपोज्योती रसोऽमृतं ब्रह्म भू र्भुव स्सुव रोम् ॥ ८९ ॥ ६८ ॥

॥ एकोनसप्ततितमोऽनुवाकः ॥

॥ प्राणाहुतिमन्त्राः ॥

श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । श्रद्धायामपाने निविष्टोऽमृतं जुहोमि । श्रद्धायां व्याने निविष्टो ऽमृतं जुहोमि । श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि । श्रद्धायां समाने निविष्टोऽमृतं जुहोमि । ब्रह्मणि म आत्माऽमृतत्वाय । अमृतोपस्तरण मसि । श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । प्राणाय स्वाहा ॥ ९० ॥

श्रद्धायां मपाने निविष्टोऽमृतं जुहोमि । शिवो मा विशा प्रदाहाय । अपानाय स्वाहा । श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । व्यानायस्वाहा । श्रद्धाया मुदाने निविष्टोऽमृतं जुहोमि । शिवोमा विशाप्रदाहाय । उदानाय स्वाहा । श्रद्धायागं समाने निविष्टो

ऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । समानाय स्वाहा । ब्रह्मणि म आत्माऽमृतत्वाय । अमृतापिधान मसि ॥ ९१ ॥

प्राणाय स्वाहा समाने निविष्टोऽमृतं जुहोमि चत्वारि च ॥ ६९ ॥

---

## ॥ सप्ततितमोऽनुवाकः ॥

### ॥ भुक्तान्नाभिमन्त्रणमन्त्रः ॥

श्रद्धायां प्राणे निविश्यामृतगं हुतम् । प्राणमन्नेनाप्यायस्व । श्रद्धाया मपाने निविश्यामृतगं हुतम् । अपान मन्नेनाप्यायस्व । श्रद्धायां व्याने निविश्यामृतगं हुतम् । व्यान मन्नेनाप्यायस्व । श्रद्धाया मुदाने निविश्यामृतगं हुतम् । उदान मन्नेनाप्यायस्व । श्रद्धायागं समाने निविश्यामृतगं हुतम् । समान मन्नेनाप्यायस्व ॥ ९२ ॥ ७० ॥

Indira Gandhi National Centre for the Arts

---

## ॥ एकसप्ततितमोऽनुवाकः ॥

### ॥ जीवात्मस्वरूपानुसंधानमन्त्रः ॥

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः । ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ॥ ९३ ॥ ७१ ॥

---

## ॥ द्विसप्ततितमोऽनुवाकः ॥

### ॥ अवयवस्वस्थता प्रार्थनामन्त्रः ॥

वाङ्म आसन् । नसोः प्राणः । अक्ष्योश्चक्षुः । कर्णयोश्श्रोत्रम् । बाहुवोर्बलम् । ऊरुवोरोजः । अरिष्टा विश्वान्यङ्गानि तनूः । तनुवा मे सह नमस्ते अस्तुमा माहिगंसीः ॥ ९४ ॥ ७२ ॥

---

## ॥ त्रिसप्ततितमोऽनुवाकः ॥

॥ इन्द्रसप्तर्षि संवादमन्त्रः ॥

वयं स्सुपर्णा उपसेदु रिन्द्रं प्रियमेधा ऋषयो नाधमानाः। अपध्वान्त मूर्णुहि पूर्धि चक्षुं मुमुग्ध्यस्मान्निधयेऽव बद्धान् ॥ १५ ॥ ७३ ॥

---

## ॥ चतुस्सप्ततितमोऽनुवाकः ॥

॥ हृदयालंभनमन्त्रः ॥

प्राणानां ग्रन्थि रसि रुद्रो माविशान्तकः। तेनान्नेनाप्यायस्व ॥ १६ ॥ ७४ ॥

---

## ॥ पंचसप्ततितमोऽनुवाकः ॥

॥ देवताप्राणनिरूपणमन्त्रः ॥

नमोरुद्राय विष्णवे मृत्यु र्मे पाहि ॥ १७ ॥ ७५ ॥

---

## ॥ षट्सप्ततितमोऽनुवाकः ॥

॥ अग्निस्तुतिमन्त्रः ॥

त्वमग्ने द्युभि स्त्व माशुशुक्षणि स्त्व मद्भ्यस्त्वमश्मनस्परि। त्वं वनेभ्य स्त्वमोषधीभ्य स्त्वं नृणां नृपते जायसे शुचिः ॥ १८ ॥ ७६ ॥

---

## ॥ सप्तसप्ततितमोऽनुवाकः ॥

॥ अभीष्टयाचनामन्त्रः ॥

शिवेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्यर्धि मनु संतिष्ठस्वोप ते यज्ञ नम उप ते नम उप ते नमः ॥ ९९ ॥ ७७ ॥

## ॥ अष्टसप्ततितमोऽनुवाकः ॥

॥ ज्ञानसाधनविधानम् ॥

सत्यं परं परग्ं सत्यग्ं सत्येन न सुवर्गा ल्लोकाच्च्यवन्ते कदाचन सताग्ं हि सत्यं तस्मा थ्सत्ये रमन्ते तपइति तपो नानशना-त्परं यद्धि परं तप स्तद्दुर्धर्षं तद्दुराधर्षं तस्मा त्तपसि रमन्ते दम इति नियतं ब्रह्मचारिण स्तस्मा द्दमे रमन्ते शम इत्यरण्ये मुनय स्तस्मा-च्छमे रमन्ते दान मिति सर्वाणि भूतानि प्रशग्ंसन्ति दाना न्नाति दुश्चरं तस्मा द्दाने रमन्ते धर्म इति धर्मेण सर्व मिदं परिगृहीतं धर्मा-न्नातिदुष्करं तस्मा द्धर्मे रमन्ते प्रजन इति भूयाग्ंस स्तस्माद्भूयिष्ठाः प्रजा यन्ते तस्मा द्भूयिष्ठाः प्रजनने रमन्तेऽग्नय इत्याह तस्मा दग्नय आधातव्या अग्निहोत्र मित्याह तस्मा दग्निहोत्रे रमन्ते यज्ञ इति यज्ञो हि देवा स्तस्मा द्यज्ञे रमन्ते मानस मिति विद्वाग्ंस स्तस्मा द्विद्वाग्ंस एव मानसे रमन्ते न्यास इति ब्रह्मा ब्रह्माहि परः परो हि ब्रह्मा तानिवा एतान्यवराणि पराग्ंसि न्यास एवात्य रेचय द्य एवं वेदे"-त्युपनिषत् ॥ १०० ॥ ७८ ॥

———

## ॥ एकोनाशीतितमोऽनुवाकः ॥

### ॥ आख्यायिकामुखेन ज्ञानसाधननिरूपणम् ॥

प्राजापत्यो हारुणि स्सुपर्णेयः प्रजापतिं पितर मुपससार किं
भगवन्तः परमं वदन्तीति तस्मै प्रोवाच सत्येन वायु रावाति
सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं
तस्मा थ्सत्यं परमं वदन्ति तपसा देवादेवता मग्र आय न्तपसर्षय-
स्सुवरन्वविन्दन्तपसा सपत्नान्प्रणुदमारातीस्तपसि सर्वं प्रतिष्ठितं तस्मा
त्तपः परमं वदन्ति दमेन दान्ताः किल्बिष मवधून्वन्ति दमेन
ब्रह्मचारिण स्सुवर् गच्छ न्दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं
तस्माद्दमः परमं वदन्ति शमेन शान्ता श्शिव माचरन्ति शमेन
नाकंमुनयोऽन्वविन्दञ्छमो भूतानां दुराधर्षञ्छमे सर्वं प्रतिष्ठितं तस्मा-
च्छमः परमं वदन्ति दानं यज्ञानां वरूथं दक्षिणा लोके दातारग्ं सर्व-
भूतान्युपजीवन्ति दानेनाराती रपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति
दाने सर्वं प्रतिष्ठितं तस्मा द्दानं परमं वदन्ति धर्मो विश्वस्य जगतः प्रतिष्ठा
लोकेधर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पाप मपनुदति धर्मे सर्वं प्रतिष्ठितं
तस्मा द्धर्मं परमं वदन्ति प्रजननं वै प्रतिष्ठा लोके साधुप्रजायाँ स्तन्तुं
तन्वानः पितृणा मनृणो भवति तदेव तस्या अनृणं तस्मा त्प्रजननं
परमं वदन्त्यग्नयो वै त्रयी विद्या देवयानः पन्था गार्हपत्य ऋक्पृ-
थिवी रथन्तर मन्वाहार्यपचनं यजु रन्तरिक्षं वामदेव्य माहवनीय-
स्सामसुवर्गो लोको बृहत्तस्मा दग्नी न्परमं वदन्त्यग्निहोत्रग्ं सायं प्रात-
र्गृहाणां निष्कृति स्स्विष्टग्ं सुहुतं यज्ञक्रतूनां प्रायणग्ं सुवर्गस्य

लोकस्य ज्योति स्तस्मा दग्निहोत्रं परमं वदन्ति यज्ञ इति यज्ञेन हि देवा दिवं गतायज्ञेनासुरा नपानुदन्त यज्ञेन द्विषन्तो मित्रा भवन्ति यज्ञेसर्वं प्रतिष्ठितं तस्मा द्यज्ञं परमं वदन्ति मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसा ऋषयःप्रजा असृजन्त मानसे सर्वं प्रतिष्ठितं तस्मा न्मानसं परमं वदन्ति न्यास इत्याहु र्मनीषिणो ब्रह्माणं ब्रह्मा विश्वःकतम स्स्वयम्भु प्रजापति स्संवथ्सर इति संवथ्सरोऽ सावादित्यो य एष आदित्ये पुरुष स्स परमेष्ठी ब्रह्मात्मा याभिरादित्य स्तपति रश्मिभि स्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधि वनस्पतयः प्रजायन्त ओषधिवनस्पतिभि रन्नं भवत्यन्नेन प्राणाः प्राणै र्बलं बलेन तप स्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शान्ति श्शान्त्या चित्तं चित्तेन स्मृतिगुं स्मृत्या स्मारगं स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मा दन्नं ददन्थ्सर्वाण्येतानि ददात्यन्ना त्प्राणा भवन्ति भूतानां प्राणै र्मनो मनस श्च विज्ञानं विज्ञाना दानन्दो ब्रह्मयोनि स्सवा एष पुरुषः पञ्चधा पञ्चमा येन सर्व मिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौ श्चदिशश्चावान्तरदिशाश्च सवै सर्व मिदं जग थ्स सभूतगूं स भव्यं जिज्ञासक्लुप्त ऋतजा रयिष्ठा श्रद्धा सत्यो महस्वा न्तपसो वरिष्ठा ज्ञात्वा तमेवं मनसा हृदा च भूयो नमृत्यु मुपयाहि विद्वा न्तस्मा-न्न्यास मेषां तपसा मतिरिक्तमाहुर्वसुरण्वोविभूरसिप्राणेत्वमसि सन्धाता ब्रह्मं स्त्वमसि विश्वधृत्तेजोदा स्त्वमस्यग्निरसिवर्चोदा स्त्वमसि सूर्यस्य द्युम्नोदा स्त्वमसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वा

महस ओमित्यात्मानं युञ्जीत तद्वै महोपनिषदं देवानां गुह्यं य एवं वेदब्रह्मणो महिमान माप्नोति तस्माद् ब्रह्मणो महिमान मित्युपनिषत् ॥ १०१ ॥ ७९ ॥

---

## ॥ अशीतितमोऽनुवाकः ॥

॥ लौकिकव्यवहाराणां यागरूपप्रतिपादकश्रुतिः ॥

तस्यैवं विदुषो यज्ञस्यात्मा यजमान श्श्रद्धापत्नीशरीर मिध्म-मुरो वेदिर्लोमानि बर्हिर्वेद श्शिखाहृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दम श्शमयिता दक्षिणावा ग्घोता प्राण उद्गाता चक्षुर-ध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षायदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यथ्संचरत्युपविशत्युत्तिष्ठते च सप्रवर्ग्यो यन्मुखं तदाहवनीयो याव्याहृति राहुति र्यदस्य विज्ञानं तज्जुहोति यथ्सायं प्रातरत्ति तथ्समिधं यत्प्रातर्मध्यन्दिनग्ं सायं च तानि सवनानि ये अहोरात्रे तेदर्शपूर्णमासौ यें ऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि यऋतवस्ते पशुबन्धाये संवत्सराश्च परिवथ्सराश्च तेऽहर्गणास्सर्ववेदसं वा एतथ्सत्रं यन्मरणं तदवभृथ एतद्वैजरामर्य-मग्निहोत्रग्ंसत्रं य एवं विद्वा नुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणा मेव महिमानं गत्वा चन्द्रमसस्सायुज्यग्ं सलोकता माप्नोत्येतौ वै सूर्या-चन्द्रमसो र्महिमानौ ब्राह्मणो विद्वा नभिजयति तस्माद् ब्रह्मणो महि-मानमाप्नोति तस्माद् ब्रह्मणो महिमानम् ॥ १०२ ॥ ८० ॥

अम्भस्यैकंपञ्चाशच्छतं जातवेदसे चतुर्दश भूरन्नं भूरग्नये भूरग्नये चैकमेकं पाहि पाहि चत्वारि चत्वारि यश्छन्दसां द्वे नमो ब्रह्मण ऋतं तपो यथावृक्षस्यैक मेक मणोरणीयागूं श्चतुस्त्रिगूंश त्सह-स्त्रशीर्षगंषड्विगूंशति रादित्यो वा एष आदित्यो वै तेज एकमेकं निधनपतये त्रयोविगूंशति स्सद्योजातं त्रीणि वामदेवायैक मघोरेभ्य-स्तत्पुरुषाय द्वे द्वे ईशानो नमोहिरण्यबाहव एकमेकमृतगूं सत्यं द्वे सर्वो वैरुद्रश्चत्वारि कद्रुद्राय त्रीणि यस्य वैकङ्कती कृणुष्वपाजोऽदिति-रापोवा इदगूं सर्व मेकमेकः मापः पुनन्तु चत्वार्यग्निश्च सूर्यश्च नव नवो मितिचत्वार्या यातु पञ्चौजोसि दशोत्तमे चत्वारि घृणिस्त्रीणि ब्रह्ममेतुमां षास्तौ ब्रह्महत्यां द्वादश ब्रह्म मेधया ऽद्यानइमं भ्रूणहत्यां ब्रह्म मेधवा ब्रह्मा देवानां मिदं वीरहत्या मेकान्न विगूंशतिरेकान्न-विगूंशति मेधा देवी मेधां म इन्द्रश्चत्वारि चत्वा र्या मां मेधा द्वे मयि मेधामेक मपैतु परं वातं प्राण मंमुत्र भूया द्धरिगूं शलैकं रश्मि मा छिदो मृत्यो मानोमहान्तं मानस्तोके प्रजापते स्वस्तिदा त्र्यम्बकं येते सहस्र मयुतं द्वे द्वे मृत्यवे स्वाहैकं देवकृतस्यैकादश यद्वो देवाः कामोऽकार्षीन्मन्यु रकार्षीद्द्वे तिला ञ्जुहोमि गाव श्श्रियं प्रजाः पञ्च तिलाः कृष्णाश्चोरस्य श्रीः प्रज्ञातु जातवेद स्सप्तप्राण वाक्त्वक्छिर उत्तिष्ठ पुरुष पञ्च पृथिवी शब्द मनो वागव्यक्तात्माऽन्तरात्मा परमात्मा मे क्षुधोऽन्नमय पञ्चदशाग्नये स्वाहैकंचत्वारिगूंशदों तद्ब्रह्म-नव श्रद्धायां प्राणे निविष्टो ऽमृतं जुहोमि चतुर्विगूंशतिश्श्रद्धायां दशाङ्गुष्ठमात्रः पुरुषो द्वे वाङ्म आसन्नष्टौ वयं स्सुपर्णाः प्राणानां

ग्रन्थिरसि रुद्रो नमो रुद्रायैकं त्वमग्नेद्युभिर्द्वे शिवेनमे संतिष्ठस्वसत्यं प्राजापत्य स्तस्यैव मेकमेक मशीतिः ॥ ८० ॥

अम्भस्यपारे स्वस्तिनः पाहिनो अग्नएकया ऽऽदित्योवा एष ऋतगं सत्य मोमित्यामां मेधामानस्तोके तिलाञ्जुहोमि श्रद्धाया मपाने निविष्टः प्राजापत्यो द्व्युत्तरशतम् ॥ १०२ ॥

॥ उत्तरशान्तिपाठः ॥

सह नाववतु । सह नौ भुनक्तु । सहवीर्यं करवावहै । तेजस्विनावधीत मस्तु माविद्विषावहै । ओं शान्ति श्शान्तिश्शान्तिः ॥

हरिः ओम् ॥ श्रीकृष्णार्पणमस्तु ॥

इति तैत्तिरीयोपनिषदि चतुर्थप्रपाठके

आन्ध्रपाठस्समाप्तः ॥

आरण्यकं च समाप्तम् ॥

ओं

# श्रीकृष्णयजुरारण्यके

## ॥ तृतीयः प्रपाठकः ॥

॥ चातुर्होतृचयनम् ॥

अनुवाकाः ॥ २१ ॥

१ अनुवाकादि १३ अनुवाकपर्यन्तं काण्डर्षिः प्रजापतिः ।

### ॥ शांतिपाठः ॥

ओम् ॥ तच्छंयो रावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्ति मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे । ओं शान्ति श्शान्ति श्शान्तिः ।

### ॥ प्रथमोऽनुवाकः ॥

॥ दशहोतृुपधान मन्त्र ग्रहेष्टकोपधानमन्त्रौ ॥

१ हरिः ओं ॥ १ चित्ति स्स्रुक् । चित्त माज्यम् । वाग्वेदिः । आधीतं बर्हिः । केतो अग्निः । विज्ञात मग्निः । वाक्पति-र्होता । मन उपवक्ता । प्राणो हविः । सामाध्वर्युः ॥ २ वाचस्पते

विधे नामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिस्सोमं पिबतु । आऽस्मासु नृम्णं धात्स्वाहा ॥ १ ॥

अध्वर्युः पञ्च च ॥ १ ॥

---

## ॥ द्वितीयोऽनुवाकः ॥

॥ चतुर्होत्रुपधानग्रहेष्टकोपधानमन्त्रौ ॥

१ पृथिवी होता । द्यौ रध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता । २ वाचस्पते वाचो वीर्येण । संभृततमेनाऽऽयक्ष्यसे । यजमानाय वार्यम् । आ सुव स्क रस्मै । वाचस्पति स्सोमं पिबति । जजन दिदिन्द्रं मिन्द्रियाय स्वाहा ॥ २ ॥

पृथिवीहोता दश ॥ २ ॥

---

## ॥ तृतीयोऽनुवाकः ॥

॥ पञ्चहोत्रुपधानग्रहेष्टकोपधानमन्त्रौ ॥

१ १ अग्निर् होता । अश्विनाऽध्वर्यू । त्वष्टाऽग्नीत् । मित्र उपवक्ता । २ सोम स्सोमस्य पुरोगाः । शुक्र श्शुक्रस्य पुरोगाः । श्रातास्त इन्द्रसोमाः । वातापेर् हवनश्रुत स्स्वाहा ॥ ३ ॥

अग्निर् होताऽष्टौ ॥ ३ ॥

---

## ॥ चतुर्थोऽनुवाकः ॥

॥ षड्ढोत्रुपधान ग्रहेष्टकोपधानमन्त्रौ ॥

१ १ सूर्यं ते चक्षुः । वातं प्राणः । द्यां पृष्ठम् । अन्तरिक्ष मात्मा ।
अङ्गै र्यज्ञम् । पृथिवीगं शरीरैः । २ वाचस्पतेऽच्छिद्रया वाचा ॥
अच्छिद्रया जुह्वा । दिवि देवावृधगं होत्रा मेरयस्व स्वाहा ॥ ४ ॥
सूर्यं ते नव ॥ ४ ॥

---

## ॥ पञ्चमोऽनुवाकः ॥

॥ सप्तहोत्रुपधानग्रहेष्टकोपधानमन्त्रौ ॥

१ १ महाहविर् होता । सत्यहवि रध्वर्युः । अच्युतपाजा अग्नीत् ।
अच्युतमना उपवक्ता । अन धृष्यश्चाप्रतिधृष्यश्च । यज्ञस्याभिगरौ ।
अयास्य उद्गाता । २ वाचस्पते हृद्विधे नामन् । विधेम ते नाम ।
विधे स्त्व मस्माकं नाम । वाचस्पति स्सोममपात् । मादैव्य स्तन्तु-
श्छेदि मामनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा ॥ ५ ॥
अपात्तीणि च ॥ ५ ॥

---

## ॥ षष्ठोऽनुवाकः ॥

॥ षड्ढोतुपधानग्रहेष्टकोपधानमन्त्रौ ॥

१ १ वाग्घोता । दीक्षा पत्नी । वातो ऽध्वर्युः । आपो ऽभिगरः ।
मनो हविः । तपसि जुहोमि । २ भू र्भुव स्सुवः । ब्रह्म स्वयम्भु ।
ब्रह्मणे स्वयम्भुवेस्वाहा ॥ ६ ॥

वाग्घोता नव ॥ ६ ॥

---

## ॥ सप्तमोऽनुवाकः ॥

### ॥ चातुर्मास्योङ्केश निवर्तनमन्त्राः ॥

१ ☞ १ ब्राह्मण एकहोता । स यज्ञः । स मे ददातु प्रजां पशून्पुष्टिं यशः । यज्ञश्च मे भूयात् । २ अग्नि र्द्विहोता । स भर्ता । स मे ददातु प्रजां पशू न्पुष्टिं यशः । भर्ता च मे भूयात् । ३ पृथिवी त्रिहोता । स प्रतिष्ठा ॥ ७ ॥

२ ☞ समे ददातु प्रजां पशून्पुष्टिं यशः । प्रतिष्ठा च मे भूयात् । ४ अन्तरिक्षं चतुर्होता । स विष्ठाः । स मे ददातु प्रजां पशून्पुष्टिं यशः । विष्ठा श्च मे भूयात् । ५ वायुः पञ्चहोता । स प्राणः । स मे ददातु प्रजां पशू न्पुष्टिं यशः । प्राणश्च मे भूयात् ॥ ८ ॥

३ ☞ ३ चन्द्रमा ष्षड्ढोता । स ऋतू न्कल्पयति । स मे ददातु प्रजां पशून्पुष्टिं यशः । ऋतव श्च मे कल्पन्ताम् । ७ अन्नग्ं सप्तहोता । स प्राणस्य प्राणः । स मे ददातु प्रजां पशू न्पुष्टिं यशः । प्राणस्य च मे प्राणो भूयात् । ८ द्यौ रष्टहोता । सो-ऽनाधृष्यः ॥ ९ ॥

४ ☞ स मे ददातु प्रजां पशून्पुष्टिं यशः । अनाधृष्यश्च भूयासम् । ९ आदित्यो नवहोता । स तेजस्वी । स मे ददातु प्रजां पशू न्पुष्टिं यशः । तेजस्वी च भूयासम् । १० प्रजापति-

दर्शहोता । स इदगं सर्वम् । स मे ददातु प्रजां पशून्पुष्टिं यशः । सर्वं च मे भूयात् ॥ १० ॥

प्रतिष्ठा । प्राणश्चमेभूया दनाधृष्य स्सर्वंच मे भूयात् ॥ ७ ॥

ब्राह्मणो यज्ञे ऽग्नि भर्ता । पृथिवी प्रतिष्ठा । अन्तरिक्षं विष्ठा । वायुः प्राण श्चन्द्रमा ऋतू । नक्षगं सप्राणस्य प्राणो । द्यौ रनाधृष्य । आदित्य स्स तेजस्वी । प्रजापति स्स इदगं सर्वगं सर्वचमे भूयात ॥[1]

---

## ॥ अष्टमोऽनुवाकः ॥

॥ संभारयजुरिष्टकोपधानमन्त्राः ॥

१ १अग्नि यजुर्भिः । २ सविता स्तोमैः । ३ इन्द्र उक्थामदैः । ४ मित्रावरुणा वाशिषा ।५ अङ्गिरसो धिष्णियै रग्निभिः । ६ मरुत-स्सदोहविर्धानाभ्याम् । ७ आपः प्रोक्षणीभिः। ८ ओषधयो बर्हिषा । ९ अदिति र्वेद्या । १० सोमो दीक्षया ॥ ११ ॥

२ ११ त्वष्टेध्मेन । १२ विष्णु र्यज्ञेन । १३ वसव आज्येन । १४ आदित्या दक्षिणाभिः । १५ विश्वे देवा ऊर्जा । १६ पूषा स्वगा-कारेण । १७ बृहस्पतिः पुरोधया । १८ प्रजापति रुद्गीथेन । १९ अन्त-रिक्षं पवित्रेण । २० वायुः पात्रैः । २१ अहगं श्रद्धया ॥ १२ ॥

दीक्षया पात्रै रेकंच ॥ ८ ॥

---

1 एतदनुवाकगतपर्यायपदप्रदर्शनमिति ज्ञेयम् ॥

## ॥ नवमोऽनुवाकः ॥

॥ पत्नीष्टकोपधानमन्त्राः ॥

१ १ सेनेन्द्रस्य । २ धेना बृहस्पतेः । ३ पथ्या पूष्णः ।
४ वाग्वायोः । ५ दीक्षा सोमस्य । ६ पृथिव्यग्नेः । ७ वसूनां
गायत्री । ८ रुद्राणां [1]त्रिष्टुक् । ९ आदित्यानां जगती । १० विष्णो-
रनुष्टुक् ॥ १३ ॥

२ ११ वरुणस्य विराट् । १२ यज्ञस्य पङ्क्तिः । १३ प्रजापते-
रनुमतिः । १४ मित्रस्य श्रद्धा । १५ सवितुः प्रसूतिः । १६
सूर्यस्य मरीचिः । १७ चन्द्रमसो रोहिणी । १८ ऋषीणा मरु-
न्धती । १९ पर्जन्यस्य विद्युत् । २० चतस्रो दिशः । २१ चत-
स्रोऽवान्तरदिशाः । २२ अहश्च रात्री श्च । २३ कृषि श्च वृष्टि श्च
२४ त्विषि श्चापचितिश्च । २५ आप श्चौषधयश्च । २६ ऊर्क्च
सूनृता च देवानां पत्न्यः ॥ १४ ॥

अनुष्टुग्दिशषट्च ॥ ९ ॥

---

## ॥ दशमोऽनुवाकः ॥

॥ प्रतिग्रहेष्टकोपधानमन्त्राः ॥

१ १ देवस्य त्वा सवितुः प्रसवे । अश्विनो बाहुभ्याम् । पूष्णो
हस्ताभ्यां प्रतिगृह्णामि । राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्न-

---

1. ‘ त्रिटुष्प् ’ ‘ क ’ पुस्तके शोधितः पाठः ॥ स च न वैदिकेषु प्रसिद्धः ॥

ये हिरण्यम् । तेनामृतत्व [1]मश्याम् । वयो दात्रे । मयो मह्य-
मस्तु प्रतिग्रहीत्रे । क इदं कस्मा अदात् । कामः कामाय ।
कामो दाता ॥ १५ ॥

२ कामः प्रतिग्रहीता । कामगं समुद्र माविश । कामेन त्वा
प्रतिगृह्णामि । कामैतत्ते । एषा ते काम दक्षिणा । उत्तान स्त्वा-
ऽऽङ्गीरसः प्रतिगृह्णातु । २ सोमाय वासः । ३ रुद्राय गाम् ।
४ वरुणायाश्वम् । ५ प्रजापतये पुरुषम् ॥ १६ ॥

३ ६ मनवे तल्पम् । ७ त्वष्ट्रेऽजाम् । ८ पूष्णेऽविम् । ९ निर्-
ऋत्या अश्वतरगर्दभौ । १० हिमवतो हस्तिनम् । ११ गन्धर्वा-
प्सराभ्यस्स्रगलङ्करणे । १२ विश्वेभ्यो देवेभ्यो धान्यम । १३ वाचो
ऽन्नम् । १४ ब्रह्मण ओदनम् । १५ समुद्रायापः ॥ १७ ॥

४ १६ उत्तानायाङ्गीरसायानः । १७ वैश्वानराय रथम् ॥ १८
वैश्वानरः प्रत्नथा नाक मारुहत् । दिवः पृष्ठं भन्दमान सुमन्म-
भिः । सपूर्वव ज्जनय ज्जन्तवे धनम् । समान मज्मापरियाति
जागृतिः । १९ राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय
रथम् । तेनामृतत्व मश्याम् । वयो दात्रे । मयो मह्यमस्तु प्रति-
ग्रहीत्रे ॥ १८ ॥

५ क इदं कस्मा आदात् । कामः कामाय । कामो दाता ।
कामः प्रतिग्रहीता । कामगूं समुद्र माविश । कामेन त्वा प्रति-

1. 'मश्याम्' इति 'क' पुस्तक पाठः ।

गृह्णामि । कामैत त्ते । एषा ते काम दक्षिणा । उत्तानस्त्वाऽऽङ्गी-
रसः प्रतिगृह्णातु ॥ १९ ॥

दाता, पुरुष, मापः, प्रतिग्रहीत्रे, नवच ॥ १० ॥

## ॥ एकादशोऽनुवाकः ॥

### ॥ होतृहृदयेष्टकोधानमन्त्राः ॥

१ १ सुवर्णं धर्मं परि वेद वेनम् । इन्द्रस्याऽऽत्मानं दशधाचर-
न्तम् । अन्त स्समुद्रे मनसा चरन्तम् । ब्रह्माऽन्वविन्द दशहोतार
मर्णे । २ अन्तः प्रविष्ट श्शास्ता जनानाम् । एक स्स न्बहुधा
विचारः । शतगं शुक्राणि यत्रैकं भवन्ति । सर्वे वेदा यत्रैकं
भवन्ति । सर्वे होतारो यत्रैकं भवन्ति । स मानसीन आत्मा
जनानाम् ॥ २० ॥

२ ☞ ३ अन्तः प्रविष्ट श्शास्ता जनानागं सर्वात्मा । सर्वाः ।
प्रजायत्रैकं भवन्ति । चतुर्होतारो यत्र सम्पदं गच्छन्ति देवैः ।
स मानसीन आत्मा जनानाम् । ४ ब्रह्मेन्द्र मग्निं जगतः प्रतिष्ठाम् ।
दिव आत्मानगं सवितारं बृहस्पतिम् । चतुर्होतारं प्रदिशो
ऽनुकॢप्तं । वाचो वीर्यं तपसा ऽन्वविन्दन् । ५ अन्तः प्रविष्टं
कर्तार मेतम् । त्वष्टारगं रूपाणि विकुर्वन्तं विपश्चिम् ॥ २१ ॥

३ ☞ अमृतस्य प्राणं यज्ञ मेतम् । चतुर्होतृणा मात्मानं कवयो निचिक्युः । ६ अन्तः प्रविष्टं कर्तार मेतम् । देवानां बन्धुनिहितं गुहासु । अमृतेन क्लृप्तं यज्ञ मेतम् । चतुर्होतृणा मात्मानं कवयो निचिक्युः । ७ शतं नियुतः परिवेद विश्वा विश्ववारः । विश्व मिदं वृणाति । इन्द्रस्याऽऽत्मा निहितः पञ्चहोता । अमृतं देवानामायुः प्रजानाम् ॥ २२ ॥

४ ☞ ८ इन्द्रगूं राजानगूं सवितार मेतम् । वायो रात्मानं कवयो निचिक्युः । रश्मिगूं रश्मीनां मध्ये तपन्तम् । ऋतस्य पदे कवयो निपान्ति । ९ य आण्डकोशे भुवनं बिभर्ति । अनिर्भिण्ण स्सन्नथ लोकान् विचष्टे । यस्याण्डकोशगूं शुष्म माहु प्राणमुल्बम् । तेन क्लृप्तो ऽमृतेनाह मस्मि । १० सुवर्णं कोशगूं रजसा परीवृतम् । देवानां वसुधानीं विराजम् ॥ २३ ॥

५ अमृतस्य पूर्णां तामु कलां विचक्षते । पादगूं षड्ढोतुर्नकिलाऽऽविवित्से । ११ येनर्तवः पञ्चधोतक्लृप्ताः उत वा षड्धा मनसोतक्लृप्ताः । तगूं षड्ढोतार मृतुभि कल्पमानम् । ऋतस्य पदे कवयो निपान्ति । १२ अन्तः प्रविष्टं कर्तार मेतम् । अन्तश्चन्द्रमसि मनसा चरन्तम् । सहैव सन्तं न विजानन्ति देवाः । इन्द्रस्याऽऽत्मानगूं शतधा चरन्तम् ॥ २४ ॥

६ १३ इन्द्रो राजा जगतो य ईशे । सप्तहोता सप्तधा विक्लृप्तः । १४ परेण तन्तुं परिषिच्यमानम् । अन्त रादित्ये मनसा च

न्तम् । देवानागं हृदयं ब्रह्माऽन्वविन्दन् । १५ ब्रह्मैतद्ब्रह्मण उज्जहार । अर्कग्गं श्चोतन्तगं सरिरस्य मध्ये । १६ आयस्मिन्त्सप्त पेरवः । मेहन्ति बहुलागं श्रियम् । बह्वश्वा मिन्द्रगोमतीम् ॥ २५ ॥

७ ☞ १७ अच्युतां बहुलागं श्रियम् । सहरि र्वसुवित्तमः । पेरु रिन्द्राय पिन्वते । १८ बह्वश्वा मिन्द्र गोमतीम् । अच्युतां बहुलागं श्रियम् । मह्य मिन्द्रो नियच्छतु । १९शतगं शता अस्य-युक्ता हरीणाम् । अर्वा ङा यातु वसुभी रश्मि रिन्द्रः । प्रमगंहमाणो बहुलागं श्रियम् । रश्मि रिन्द्र स्सविता मे नियच्छतु ॥ २६ ॥

८ २० घृतं तेजा मधुम दिद्रियम । मय्यय मग्नि र्दधातु । २१ हरिः पतङ्गः पटरी सुपर्णः । दिविक्षयो नभसाय एति । स न इन्द्रः कामवरं ददातु । २२ पञ्चारंचक्रं परि वर्तते पृथु । हिरण्यज्योति-स्सरिरस्य मध्ये । अजस्रं ज्योति र्नभसा सर्पदेति । स न इन्द्रः कामवरं ददातु । २३ सप्त युञ्जन्ति रथ मेकचक्रम् ॥ २७ ॥

९ एको अश्वो वहति सप्तनामा । त्रिनाभि चक्र मजर मनर्वम्[1] । येनेमा विश्वा भुवनानि तस्थुः । २४ भद्रं पश्यन्त उपसेदुरग्रे । तपोदीक्षा मृषय स्सुवर्विदः । ततः क्षत्रं बल मोजश्च जातम् । तदस्मै देवा अभिसं नमन्तु । २५ श्वेतगं रश्मिबोभुज्यमानम् । अपांनेतारं भुवनस्य गोपाम् । इन्द्रं निचिक्युः परमे व्योमन् ॥ २८ ॥

1. 'मनर्वां' इति 'क' पुस्तकपाठः ॥

१० २६ रोहिंणीः पिङ्गला एकरूपाः । क्षरन्तीः पिङ्गला एकरूपाः ।
शतगूं सहस्राणि प्रयुतानि नाव्यानाम् । २७ अयं यश्श्वेतो रश्मिः ।
परि सर्व मिदं जगत् । प्रजां पशू न्धनानि । अस्माकं ददातु ।
२८ श्वेतो रश्मिः परि सर्वं बभूव । सुव न्मह्यं पशून् विश्वरू-
पान् । २९ पतङ्ग मक्त मसुरस्य मायया ॥ २९ ॥

११ हृदा पश्यन्ति मनसा मनीषिणः । समुद्रे अन्तः कवयो
विचक्षते । मरीचीनां पद मिच्छन्ति वेधसः । ३० पतङ्गो वाचं
मनसा बिभर्ति । तां गन्धर्वोऽवद द्गर्भे अन्तः । तां द्योतमानागूं
स्वर्यं मनीषाम् । ऋतस्य पदे कवयो निपान्ति । ३१ ये ग्राम्याः
पशवो विश्वरूपाः । विरूपा स्सन्तो बहुधैकरूपाः । अग्निस्तागं
अग्रे प्रमुमोक्तु देवः ॥ ३० ॥

Indira Gandhi National Centre for the Arts

१२ प्रजापतिः प्रजया संविदानः । ३२ वीतगूं स्तुकेस्तुके । युव-
मस्मासु नियच्छतम् । प्रप्र यज्ञपतिं तिर । ३३ ये ग्राम्याः पशवो
विश्वरूपाः । विरूपा स्सन्तो बहुधैकरूपाः । तेषागं सप्ताना मिह
रन्ति रस्तु । रायस्पोषाय सुप्रजास्त्वाय स्सुवीर्याय । ३४ य
आरण्याः पशवो विश्वरूपाः । विरूपा स्सन्तो बहुधैकरूपाः ॥ ३१ ॥

१३ वायुस्तागूं अग्रे प्रमुमोक्तु देवः । प्रजापतिः प्रजया संविदानः
३५ इडायै सृप्तं घृतव च्चराचरम् । देवा अन्वविन्द न्गुहाहितम् ।
३६ य आरण्याः पशवो विश्वरूपाः । विरूपास्सन्तो बहुधैक

रूपाः । तेषागूं सप्तानामिह रन्तिरस्तु । रायस्पोषाय सुप्रजा-
स्त्वाय सुवीर्याय ॥ ३२ ॥

आत्माजनानां, विकुर्वन्तं विपश्चिं, प्रजानां, वसुधानीं विराजं चरन्तं, गोमतीं मे नियच्छत्वे कचक्रं, व्योमन्मायया, देव-एकरूपा, अष्टौ च ॥ ११ ॥

## ॥ द्वादशोऽनुवाकः ॥

### ॥ नारायणोपस्थानमन्त्राः ॥

Indira Gandhi National

१ १ सहस्रशीर्षा पुरुषः । सहस्राक्ष स्सहस्रपात् । स भूमिं
विश्वतो वृत्वा । अत्यतिष्ठ दशाङ्गुलम् । २ पुरुष एवेदगूं सर्वम् ।
यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति ।
३ एतावानस्य महिमा । अतो ज्यायागूंश्च पूरुषः ॥३२=३३॥

२ पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि । ४ त्रिपादूर्ध्व
उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः । ततो विष्वङ्व्यक्रामत् ।
साशनानशने अभि । ५ तस्माद्विराडजायत । विराजो अधि-
पूरुषः । सजातो अत्यरिच्यत । पश्चाद्भूमिमथोपुरः ॥ ३३=३४॥

३ ६ यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्या-
ऽऽसीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः । ७ सप्तास्याऽऽस
न्परिधयः । त्रिस्सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः ।

ऊबध्न न्पुरुषं पशुम् । ८ तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जात-
मग्रतः ॥ ३४ ३५ ॥

४ तेन देवा अयजन्त । साध्या ऋषयश्च ये । ९ तस्माद्यज्ञा-
थ्सर्वहुतः । संभृतं पृषदाज्यम् । पशूगं स्तागं श्चक्रे वायव्यान् ।
आरण्या न्ग्राम्याश्च ये । १० तस्मा द्यज्ञा थ्सर्वहुतः । ऋच-
स्सामानि जज्ञिरे । छन्दागंसि जज्ञिरे तस्मात् । यजु स्तस्मा
दजायत ॥ ३५–३६ ॥

५ ११ तस्मा दश्वा अजायन्त । येकेचो भयादतः । गावोह
जज्ञिरे तस्मात् । तस्मा ज्जाता अजा वयः । १२ य त्पुरुषं
व्यदधुः । कतिधा व्यकल्पयन् । मुखं कि मस्य कौ बाहू । का
वूरूपादावुच्येते । १३ ब्राह्मणोऽस्य मुख मासीत् । बाहू राजन्यः
कृतः ॥ ३६-३७ ॥

६ ऊरू तदस्य य द्वैश्यः । पद्भ्यागं शूद्रो अजायत । १४
चन्द्रमा मनसो जातः । चक्षो स्सूर्यो अजायत । मुखा दिन्द्र-
श्चाग्निश्च । प्राणा द्वायु रजायत । १५ नाभ्या आसी दन्तरिक्षम् ।
शीर्ष्णो द्यौ स्समवर्तत । पद्भ्यां भूमि र्दिश श्श्रोत्रात् । तथा
लोकागं अकल्पयन् ॥ ३७–३८ ॥

७ १६ वेदाह मेतं पुरुषं महान्तम् । आदित्यवर्णं तमस स्तुपारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदा-
स्ते । १७ धाता पुरस्ता द्य मुदाजहार । शक्रः प्रविद्वान्प्रदिश-

श्वतंस्त्रः । त मेवं विद्वा नमृत इह भवति । नान्यः पन्था अय-
नाय विद्यते । १८ यज्ञेन यज्ञ मयजन्त देवाः । तानि धर्माणि
प्रथमान्यासन् । तेह नाकं महिमानं स्सचन्ते । यत्र पूर्वे साध्या-
स्सन्ति देवाः ॥ ३८—३९ ॥

पूरुषः, पुरो, श्रतो, ऽजायत, कृतो, ऽकल्पय, न्त्रास-
न्द्वेच ॥ १२ ॥

[1]ज्यायानधि पूरुषः । अन्यत्र पुरुषः ॥

---

## ॥ त्रयोदशोऽनुवाकः ॥

### ॥ उत्तरनारायणानुवाकः ॥

१ १अद्भ्यः स्सम्भूतः पृथिव्यै रसाँच । विश्वकर्मण स्समवर्त-
ताधि । तस्य त्वष्टा विदध द्रूप मेति । तत्पुरुषस्य विश्व माजान-
मग्रे । २ वेदाह मेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः पर-
स्तात् । तमेवं विद्वा नमृत इह भवति । नान्यः पन्था विद्यते
ऽयनाय । ३ प्रजापति श्चरति गर्भे अन्तः । अजायमानो बहुधा
विजायते ॥ ३९—४० ॥

२ तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पद मिच्छन्ति
वेधसः । ४ यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो
यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । ५ रुचं ब्राह्मं जन-

---

1. अस्मिन्ननुवाके ज्यायान्, अधि इत्यनयोः पदयोरनन्तरं पूरुष इति-
तदन्यत्र पुरुष इति च विवेकः ।

यन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य
देवा असन्वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ।
नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण । अमुं मनि-
षाण । सर्वं मनिषाण । ४०–४१ ॥

जायते वशे । सप्त च ॥ १३ ॥

---

## ॥ चतुर्दशोऽनुवाकः ॥

१४, १५, अनुवाकयोः काण्डर्षयः विश्वेदेवाः ॥

॥ भर्तृसूक्तम् ॥

१ १भर्ता सन्भ्रियमाणो बिभर्ति । एको देवो बहुधा निविष्टः ।
यदा भारं तन्द्रयते स भर्तुम् । निधाय भारं पुनरस्तमेति । २
तमेव मृत्युममृतं तमाहुः । तं भर्तारं तमु गोप्तारमाहुः । स
भृतो भ्रियमाणो बिभर्ति । य एनं वेद सत्येन भर्तुम् । सद्योजात
मुत जहात्येषः । उतो जरन्तं नजहात्येकम् ॥ ४१–४२ ॥

२ उतो बहूनेकमहर्जहार । अतन्द्रो देवस्सदमेव प्रार्थः ।
४यस्तद्वेद यत आबभूव । सन्धां च यागं संदधे ब्रह्मणैषः ।
रमते तस्मिन्नुत जीर्णे शयाने । नैनं जहात्यहस्सुपूर्व्येषु । ५ त्वा-
मापो अनु सर्वाश्चरन्ति जानतीः । वत्सं पयसा पुनानाः । त्व-
मग्निं हव्यवाहं समिन्धसे । त्वं भर्ता मातरिश्वा प्रजानाम् ॥
४२–४३ ॥

३ ६ त्वं यज्ञस्त्वमु वेवासि सामः । तव देवा हव मायन्ति
सर्वे । त्व मेको ऽसि बहू ननुप्रविष्टः । नमस्ते अस्तु सुहवो म
एधि । ७ नमो वा मस्तु शृणुतग्ं हवं मे । प्राणापाना वजिरग्ं
संचरन्तौ । ह्वयामि वां ब्रह्मणा तूर्त मेतम् । यो मां द्वेष्टि तं
जहितं युवाना । ८ प्राणापानौ संविदानौ जहितम् । अमुष्यासुना
मा संगसाथाम् ॥ ४३–४४ ॥

४ तं मे देवा ब्रह्मणा संविदानौ । वधाय दत्तं त महग्ं हनामि ।
९ असं ज्जजान सत आ बभूव । यं यं जजान स उ गोपो अस्य ।
यदा भारं तन्द्रयते स भर्तुम् । परास्य भारं पुन रस्तं मेति ।
१० त द्वै त्वं प्राणो अभवः । महान्भोगः प्रजापतेः । भुजः
करिष्यमाणः । यद्देवान्प्राणयो नव ॥ ४४–४५ ॥

एकं प्रजानां । गसाधां । नव ॥ १४ ॥

Indira Gandhi National Centre for the Arts

## ॥ पञ्चदशोऽनुवाकः ॥

### ॥ मृत्युसूक्तम् ॥

१ १ हरिग्ं हरन्त मनुयन्ति देवाः । विश्वस्येशानं वृषभं मती-
नाम् । ब्रह्म सरूप मनुमेद मागात् । अयनं मा विवधी विक्रमस्व ।
२ माछिदो मृत्यो मावधीः । मा मे बलं विवृहो मा प्रमोषीः ।
प्रजां मा मे रीरिष आयु रुग्र । नृचक्षसं त्वा हविषा विधेम ।
३ सद्य श्चकमानाय । प्रवेपानाय मृत्यवे ॥ ४५–४६ ॥

२ प्रास्मा आशा अश्रृण्वन । कामेना जनय न्पुनः । ४ कामेन
मे काम आगात् । हृदया द्धृदयं मृत्योः । य दमीषा मदप्रियम ।
तदेतूप मा मभि । ५ परं मृत्यो अनुपरेहि पन्थाम । यस्ते स्व
इतरो देवयानात् । चक्षुष्मते श्रृण्वते ते ब्रवीमि । मा नः
प्रजागं रीरिषो मोत वीरान् । ६ प्रपूर्व्यं मनसा वन्दमानः ।
नाधमानो वृषभं चर्षणीनाम । यः प्रजाना मेकरा ण्मानुषीणाम् ।
मृत्युं यजे प्रथमजा मृतस्य ॥ ४६–४७ ॥

मृत्यवे, वीरागं, श्चन्वारिंच ॥ १५ ॥

---

## ॥ षोडशोऽनुवाकः ॥

### ॥ सूर्योपस्थानमन्त्रः[1] ॥

१ १ तरणि र्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्व माभासि-
रोचनम । उपयाम गृहीतो ऽसि सूर्याय त्वा भ्राजस्वत एष ते
योनि स्सूर्याय त्वा भ्राजस्वते ॥ ५७–५८–१६ ॥

Indira Gandhi National Centre for the Arts

---

## ॥ सप्तदशोऽनुवाकः ॥

१७. १८, १९, अनुवाकानां काण्डर्षिः अग्निः ॥

### ॥ प्रेतदाहस्थानसमीपखातावटे जलसङ्ग्राहनमन्त्रः[2] ॥

१ १ आप्यायस्व मदिन्तम सोम विश्वाभि रूतिभिः । भवा
नस्सप्रथस्तमः ॥ ४८–४९–१७ ॥

---

1. भट्टभास्करस्तु–'अतिग्राह्यांतःपाति सौर्यग्रहग्रहणमन्त्र' इति व्याचख्यौ ॥
2. „ 'चमपोपदंशनप्रायश्चितमन्त्र' इति व्याचख्यौ ॥

## ॥ अष्टादशोऽनुवाकः ॥

॥ अवगाहने विनियुक्तमन्त्रः[1] ॥

१ इयु ष्टे ये पूर्वतरा मपंश्य न्व्युच्छन्तीं मुषसं मर्त्यासः ।
अस्माभि रू नु प्रतिचक्ष्याऽभूदोतेयन्ति ये अपरीषु पश्यान् ॥
४९-५०-१८ ॥

---

## ॥ एकोनविंशोऽनुवाकः ॥

॥ उपोषणे दाहे विनियुक्तानि यजूंषि[2] ॥

१ १ ज्योतिष्मतीं त्वा सादयामि २ ज्योतिष्कृतं त्वा सादयामि
३ ज्योतिर्विदं त्वा सादयामि ४ भास्वतीं त्वा सादयामि ५ ज्वल-
न्तीं त्वा सादयामि ६ मल्मला भवन्तीं त्वा सादयामि ७ दीप्य-
मानां त्वा सादयामि ८ रोचमानां त्वा सादया ९ मजस्रां त्वा
सादयामि १० बृहज्ज्योतिषं त्वा सादयामि ११ बोधयन्तीं त्वा
सादयामि १२ जाग्रतीं त्वा सादयामि ॥ ५०=५१-१९ ॥

---

## ॥ विंशोऽनुवाकः ॥

॥ पितृमेधांग स्रुवाहुतिमन्त्राः[3] ॥

१ १ प्रयासाय २ स्वाहा ऽऽयासाय स्वाहा ३ वियासायस्वाहा
४ संयासाय स्वाहो ५ द्यासाय स्वाहा ६ ऽवयासाय स्वाहा

1. भट्टभास्करस्तु:—'वृष्टिनामकेष्टकोपधानमन्त्र' इति व्याचख्यौ ॥
2. ,, 'ज्योतिष्मतीष्टकोपधानमन्त्रा' इति व्याचख्यौ ॥
3. ,, 'अश्वमेधाङ्गरात्रिहोममन्त्रा' इति व्याचकार ।

७ शुचेस्वाहा ८ शाकाय स्वाहा ९ तप्यत्वै स्वाहा १० तपते स्वाहा ११ ब्रह्महत्यायै स्वाहा १२ सर्वस्मैस्वाहा ॥ ५१-५२ ॥ २० ॥

---

## ॥ एकविंशोऽनुवाकः ॥

### ॥ राजगवी हविषो होमार्था मन्त्राः[1] ॥

१ १ चित्तगूं सन्तानेन २ भवं यक्ना ३ रुद्रं तनिम्ना । ४ पशुपतिग्गूं स्थूलहृदयेन ५ मग्निगूंहृदयेन ६ रुद्रं लोहितेन ७ शर्वं मतस्नाभ्यां ८ महादेव मन्तः पार्श्वेनौषिष्ठहनगूं शिङ्गीनिकोश्याम् ॥ ५२-५१ = ॥ २१ ॥

१ चित्तिः २ पृथिव्य ३ ग्नि ४ स्सूर्यन्ते चक्षु ५ र्महाहविर्होता ६ वाग्घोता ७ ब्राह्मणएकहोता ८ ऽऽग्नि र्यजुर्भि ९ स्सेसेन्द्रस्य १० देवस्य ११ सुवर्ग घर्मग्ं १२ सहस्रशीर्षा १३ ऽद्भ्यो १४ भर्ता १५ हरिं १६ तरणि १७ राध्यायस्वे १८ युष्ट्ये १९ ज्योतिष्मतीं २० प्रयासाय २१ चित्त, मेकविगूंशतिः ॥ २१ ॥

१ चित्ति ११ रग्निर्यजुर्भि । २१ रन्तः प्रविष्टः । ३१ प्रजापति ४१ र्भर्तास । ५१, ५२ न्प्रयासाय द्विपञ्चाशत ॥ ५२ ॥

---

1. भट्टभास्करस्तु—'ब्रह्ममेधाङ्गमन्त्रा' इति व्याचख्यौ

१ चित्तिं ११ रग्निर्यजुर्भि ११ रन्तः प्रविष्टः ३१ प्रजापतिः प्रजया संविदान ४१ स्तस्य धीरा ५१–५३ ज्योतिष्मतीं त्रिपञ्चाशात्[1] ॥ ५३ ॥ (एवंबापाठः)

हरिः ओम् ॥

॥ शान्तिपाठः ॥

त च्छंयो रावृणीमहे । गातुं यज्ञाय । गातुंयज्ञपतये । दैवी स्वस्ति रस्तु नः । स्वस्तिमानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥ ओं शान्ति श्शान्ति श्शान्तिः ॥

तृतीयप्रश्नस्समाप्तः ॥

---

1. 'एतत्प्रपाठकगतैकादशानुवाकस्य द्वादशदशत्यनन्तरं अवशिष्टवाक्याष्टकस्य पृथक्दशतित्वेन केचन स्वीकुर्वन्ति। तेषां मते तु त्रिपञ्चाशत्(५३) दशतयः। इतरेषां मतेतु (५२) दशतयः' इति विवेकः।

IGNCA RAR
ACC. No. R-734
Indira Gandhi National Centre for the Arts